
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-2964

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	A[illegible] Pa[illegible]
सहस्त्रदंताकथा	महादेव	कथा	पूर्ण	-	3/9	86	संस्कृत	कागद	12	51		

श्रीगणेशायनमः ॥ श्रीविश्वेशंमुनिंबोधायनंकात्यायनंगुरुम् अस्मद्वद्धजनानां सद्गुरुंच हरिशंकरम् ॥
१ १ याग कालविवेकारं श्रीगंगाधरपाठकम् पितरंवलभद्रंच भागीरथींतुमातरम् २ गर्गादियाज्ञि
कान्स्वीयान्कपर्द्यादीन्नरानपि प्रणम्यमनसावाचाकर्मणापिचभक्तितः ३ तैत्तिरीयश्रुतिंसूत्रं
मापश्चित्तप्रदीपंदीपकं देवाऽनंतप्रयोगंचतथागोपालकारिकां ४ प्रयोगैकेशवाऽनंतावापस्तं
बाऽनुसारिणो ग्रंथानेतान्सुसंगृह्य निजबुध्याविमृश्यच ५ बौधायनोक्तनक्षत्रसत्रसंज्ञाध्व
रस्यतु सूत्रभाष्यमहंकुर्वे कात्तीपानुगंतंत्विदम् ६ सूत्रम् अथातोनक्षत्रेष्टीर्व्याख्यास्यामः अ
त्राथशब्द आनंतर्ये। तच्चाग्न्यगारपवित्रेष्टिभ्यां॥ अतःशब्दोहेत्वर्थेयतः पापक्षयार्थमग्न्यगारप
वित्रेष्टी ~~यानक्षत्रेष्टयस्ताः~~ नक्षत्रपदमुपलक्षणं विहिते यानक्षत्रेष्टयोऽविहितास्तावक्तव्याः
नक्षत्रेष्टीः अतोहेतोः नक्षत्रे देवतानामुद्देशो क्रियमाणा इष्टयो नक्षत्रेष्टयस्ताः। नक्षत्रपदमुपलक्षणा १
र्थं नक्षत्रेष्टिभ्यउत्तरभाविनीनामन्यासामपियागविधानात् तेनकृत्तिकानक्षत्रप्रभृतिभरणीपर्यंता
नांनक्षत्रदेवतानांनक्षत्रेष्टिभ्य ऊर्ध्वभाविनीनांसत्यानामिष्टिदेवतानांचंद्रमस आदिविष्णुपर्यंता
= विहिते यानक्षत्रेष्टयोऽविहितास्तावक्तव्याः अतोहेतोः नक्षत्रेष्टीः नक्षत्रेदेवतानुद्देशेनक्रियमाणा इष्ट ४

नां च इष्टि रिज्यायागस्तस्य विधिं व्याख्यास्यामः विविच्य कथयिष्याम इत्यर्थः प्रतिज्ञासूत्रमेतन्नैमि
त्ताकरणं च नक्षत्रेष्ट्यधिकारे पक्रमार्थं अत्र कृत्तिकेष्ट्यारम्भ वैस्रवेष्टिपर्यन्तभिष्टीनां प्रत्येकमन्वा
धादिफलभेदेपि सत्रत्वं त्रादिष्टस्याम कं नक्षत्रसत्रारम्भमेकमेवेदं काम्यं कर्म यागांतेन नक्षत्रसत्रेण द्यु
तिरणं त्यायेति सत्रपदोपसंहारात्फलसंकीर्तनाच्च तेन इष्टीरिति बहुत्वाभिप्रायेण ज्ञेयं एकस्मिन्ने
व नक्षत्रसत्रे ऽवांतरगताः कालभेदविशेषेण समप्रधाना बहवो यागाः संतीति तेन यस्यैवावृत्तिर्नस्य क
लस्य सत्रस्येति यद्यपि ष्टिपदोपादानाद्धृत्वा च नक्षत्रेष्टिभिर्यक्ष्य इति प्रधानसंकल्पः सिद्धस्तथा
पि सत्रपदोपसंहाराद विच्छिन्नतया ऽन्य सत्रवदहरहः कर्तव्यत्वादिष्टीनां सत्र इत्यन्वर्थसंज्ञा सिद्धे
श्च नक्षत्रसत्रेणाहं यक्ष्य इति प्रधानसंकल्पं कृत्वा प्रत्यहं तत्तन्नक्षत्रेष्ट्यारंभे ऽवांतरं तत्तन्नक्ष
त्रेष्टिसंकल्पानुष्ठानं युक्तं एवमुभयपदप्रयोगसिद्धिः प्रयोगकारास्तु नक्षत्रेष्टिभिर्नक्षत्रसत्रेणे
त्युभयथा संकल्पमाचरं तितेषां मते ऽवांतरसंकल्पो ऽनुवाद एवेति ज्ञेयः कृत्तिकादिनक्षत्रनामधे
यानि तु गणकर्मंडनाख्ये ज्योतिषग्रंथे ऽश्विन्यादिक्रमेण श्लोकरूपेण पठितानि यथा अश्विनीभ

नक्षत्रेष्टिटीका

रणीचैवकृत्तिकारोहिणीमृगः आर्द्रापुनर्वसुःपुष्योऽश्लेषाचैवमघातथा पूर्वाफाचोत्तराहस्तश्चि
२ त्रास्वातिर्विशाखिका राधाज्येष्ठाचमूलर्क्षंपूर्वाषाढातथोत्तरा अभिजिद्योगइत्येषद्वेयोवेधार्मि
त्स्थ्रवणश्चैवधनिष्ठाशततारका पूर्वाभाचोत्तराभाद्राचांतिमंतुरेवती उत्तराषाढपादोंऽत्यश्रु
घस्तित्पंराकःश्रुतेः अभिजिद्योगइत्येषद्वेयोवेधार्गलाद्विधिति कृत्तिकादिनक्षत्राणांदेवता
स्तुकृत्तिकादिक्रमेणवेदांगज्योतिषेऽध्येतप्रसिद्धाः ताश्च अग्निःप्रजापतिःसोमोरुद्रोदितिर्बृह
स्पतिः सर्पाश्चपितरश्चैवभगश्चैवाऽर्यमापिच्चासविताक्तष्टाथवायुश्चेंद्राग्नीमित्रएवच इं
द्रोनिर्ऋतिरपोवैविश्वेदेवास्तथैवच विष्णुर्वसवोवरुणोऽजएकपात्तथैवच अहिर्बुध्न्यस्तथा
पूषाश्विनौयमएवच नक्षत्रदेवताह्येता इति मनुतैत्तिरीयश्रुतितोऽत्रमूलनक्षत्रदेवतानाम
भिधाने।एवंपूर्वोत्तराफल्गुन्योर्नक्षत्रदेवतयोर्व्यत्यासः तस्याखांतरीयानेकशाखाश्रुतिपरिप २
ठितमूलं भूयस्त्वात्तस्यधर्मत्वमितिन्यायानुरोधादित्यविरोधः सूत्रं।अग्निर्वाअकामयता
न्नादोदेवानां स्यामितितात्रालक्षणेनव्याख्यातः तैत्तिरीयश्रुतौतृतीयाष्टकेप्रथमप्रश्नारंभेअ

ग्निर्नः पातु कृत्तिका इत्यादिना नक्षत्रदेवतानामन्यासामिष्टिदेवतानां संचरद्देवतयोः स्विष्टकृतश्च
याज्यानुवाक्ये अभिधाय अग्निर्वा अकामयत। अन्नादो देवाना ऽ स्यामिति। स एतमग्नये कृत्तिकाभ्यः
पुरोडाशमष्टाकपालं निर्वपदित्यादिमध्ये समाम्नातं नक्षत्रसत्रप्रकरणपठितेन ब्राह्मणेन श्रुत्यामती
ष्टिगताः र्न्यायादिकामफलविशेषपुरस्कारेण ताः प्रतिज्ञा विपरीकृता नक्षत्रेष्ट्यो व्याख्याता विविक्य
कथिता उक्तास्ताः स्त्रतो ऽस्या इत्यपर्थः श्रुत्युक्ताः कृत्तिकारोहिण्यादयो नक्षत्राभिधायका श्चतुर्थ्यंताः श
ब्दा अग्न्यादिदेवतानां गुणविशेषवाचका एवं नत्वग्न्यादिवद्देवतावाचकाः मरुद्भ्यः क्रीडिभ्यो मरुद्भ्यः
सांतपनेभ्य इत्यादिवदित्येतदुपरिष्टात्केशवा ऽनंतप्रयोगाभ्यां लेखिष्यामः। एवं ब्राह्मणोपदेशेन नद्रम
देवताविशिष्टं सत्रयागस्वरूपमुक्त्वा ऽधुना तदारंभकालानाह सूत्रं॰ सा या वैशाख्याः पौर्णमास्याः
पुरस्तादमावास्या भवति सा सकृत्संवत्सरस्यापभरणीभिः संपद्यते तस्यामारभेत स्येसेकत्वं बहुवचनं
तं ह्येयं। अपभरणी नाम भरणीनक्षत्रं संवत्सरस्य वर्षस्य मध्ये वैशाख्याः पौर्णमास्याः पुरस्तात्पूर्वं पंच
दशदिनांतरे या अमावास्या चैत्रमासस्य मासांता अमा भवति यद्वा पुरस्तात्परं अग्नेर्वैशाख्याः पौर्णमा

स्या ऊर्ध्वमागामिनी या वैशाखस्य मासांत्या अमा भवति यतः पुरस्तात्षब्दस्य पूर्वाग्नयोर्वा चित्वात् न
३ क्षत्राणां क्षयवृद्धिवशाद्वैशाख्या अध ऊर्ध्वमप्यमायां भरणीयोगसंभवाच्च। सा अपभरणीभिः
चैत्रस्य वैशाखस्य वा ऽमा भरणीनक्षत्रेण युक्ता विशिष्टा संपद्यते चेदमा भवति तर्हि तस्याममावास्या
यां ता ब्राह्मणोपदेशेनोक्ता इष्टीः आरभेत ब्राह्मणोक्तानामिष्टीनामारंभः कार्यः। सकृदाद्यः प्रथ
मो यं कालइतरकालेभ्यः नक्षत्राणां क्षयवृद्धिवशादन्यस्यामप्यमावास्यायां भरणीयोगः संपद्यत ए
वेमा ततो ऽस्येतएपेक्ष्यो प्राथम्याभिप्रायेण सकृद्ग्रहणं। संवत्सरप्रतिपदोत्तरं संवत्सरस्य मध्ये ऽस्ये
वप्राथम्यात्। आरंभस्वरूपं तु स्यात्तावुक्तं। आरंभो वरणं यद्वेसंकल्पो व्रतसत्रयोरिति। तेनारभेतेत्य
नेनात्र सर्वास्तामिष्टीनां सत्रसंज्ञत्वात्सर्वेष्टिसंबंधिसत्राभिधः साधारणसंकल्पो गानुष्ठानं च
कार्यमिसर्पः अत्राह केऽपवः मंत्रब्राह्मणाभ्यां कृत्तिकानक्षत्रमारभ्यैव नक्षत्रेष्टीनां कर्त्तव्यत्वा ३
त्सर्वेदिने ऽभरणीनक्षत्रविधानाच्चतस्मिन्नारंभामोगाच्च परेषुः प्रातिपदिप्रातः प्रकृतीष्टिं कृत्वाऽ
नंतरं कृत्तिकेष्ट्यारंभः कर्त्तव्यः कपर्दिनाप्यमावास्येनेष्ट्येत्युक्तत्वाच्च किं तु तस्यामारभेतेत्यारंभ

वचनं नियमस्वीकारार्थं । एवं हि नियमः पूर्वेद्युरेव नक्षत्रसत्रेष्टीनामारम्भ । ते ऋत्विगाज्यचरुपु
रोडाशीयद्रव्यसमित्कुशदक्षिणादीनि संपादयध्वं । प्रभृति कृत्तिकानक्षत्रेष्टिमारभ्य सर्वा नक्षत्रे
ष्टीः करिष्यामीति नियमः कार्य इत्यभिप्राय इति पाठक्रमव्यत्ययेनोत्तरसूत्रं अपि वाऽमावास्या
यां पौर्णमास्यां वोपवसेद्यस्यां तल्लक्ष्म संपद्यते तत्रैषोऽत्यंतप्रदेशः संवत्सरस्येत्यनुषज्यते मंडूकप्लु
तिन्यायेन । अपि वेति पक्षांतरपरिग्रहे । तल्लक्ष्म भरणीनक्षत्रं अपि वा संवत्सरस्य मध्ये यस्यां क
स्यांचिदमावास्यायां पौर्णमास्यां वा तल्लक्ष्म भरणीनक्षत्रयोगः संपद्यते भवति तत्र तस्यामपि उप
वसेत् तैः तत्रारंभः कार्यः । एषोऽत्यंतप्रदेशः प्राप्तभरणीयोगविशेषेण सोऽप्यारंभकाल इत्यर्थः ॥ अत्र
प्रायश्चित्तप्रदीपे तु वैशाखपौर्णमास्यां वाऽमावास्यायां वाऽऽरंभः । अथवा फाल्गुनादिमासत्रये यस्यां
तिथौ भरणीयोगस्तस्यामारंभः कर्तव्यः । यस्यां तल्लक्ष्म संपद्यत इत्युक्तत्वादित्युक्तं । तत्र यस्यां ति
थावित्यनेन पर्वदिन एव भरणीयोग इति न विवक्षितं । पार्थक्येन वैशाखपर्वणोरभ्युपगमात् ते
न पर्वसन्निधौ पर्वान्यतिथावपि भरणीयोगे आरंभो भवतीति प्रदीपकाराभिप्राय इति केचित् अपरे तु

यस्यामित्यमायां पौर्णमास्यां वैव यस्याममावास्यायां पौर्णमास्यां वा भरणीयोगस्तस्यामेवाऽरंभोन
४ पर्वान्यतिथावित्याहुः परं त्वत्र मदीपकारलिखितं वैशाख्याः पौर्णमास्याः कालविधानं चिंत्य
मेव तस्मिन्नहनि भरणियोगासंभवादेव एतच्चोत्तरायणाभिप्रायेण ज्ञेयं सूत्रार्थस्तु याम्योदग
यनाभिप्रायेणैव ज्ञेयः आचार्यैरविशेषेण सूत्रितत्वात् अत एव कपर्दिस्वामिना दक्षिणायने
पि कार्तिक्यां पौर्णमास्यां वा भरणीयोगे सति तस्यामारंभ इत्युक्तं एवमाश्विन्यां पौर्णमास्या
मपि ज्ञेयं उक्ताः कालाः विधिमुपदिशति पूर्वस्तं तस्या उपवसथेऽरण्योरग्नीन्समारोप्योद
वसाय मथित्वाग्नीन्विहृत्य उपवसथमहश्चतुर्दशी तस्या इति पंचमीनिर्देशात्तस्यामिति सप्तमीनि
र्देशो आरंभविधानाच्च न षष्ठीनिर्देशः ।। तस्या अमावास्यायाः पौर्णमास्या वा उपवसथे चतुर्दश्यां
पूर्वस्मिन्नहनि अरण्योरग्नीन्समारोप्य अग्नीनिति बहुत्वश्रवणात्समारोपार्थमाहवनीयदक्षि ४
णाग्न्योरुद्धरणं कृत्वा त्रिभुनर्यादिक्रमेणारण्योः स्थापना श्रपात्तकृत्तरूदयंत इति मंत्रेण
द्विर्द्विस्तूष्णीं च समारोपं कृत्वा उदवसाय तत्रापं देशांतरे कर्मणो वहिर्भूतमुदवसानं कृत्वा गार्हप

तं मथित्वा स्वायतने विहृत्य स्थापयित्वेतरावग्नी स्वस्वायतने विहरेदित्यर्थः अत्र कर्कमतेप्यग्नीनि
त्रिवृत्त्वादुद्धरणपूर्वं त्रिषु विधिश्चोदितः समारोपोनन्तु सोमवद्गार्हपत्य एवेति विधेयं अपरे
व्याख्या तस्यामुपवसथे अग्नीन्गार्हपत्यादीनजस्रान्नित्यधृतान्वे स्वस्वायतनस्थानरण्योर्गार्हपत्या
हवनीयदक्षिणाग्निक्रमेण समारोप्यारणिपाणिरुदवसाय सत्रभूमौ देशांतरे गत्वा मथित्वाग्नी
न्गार्हपत्याहवनीयदक्षिणाग्नीन् मथित्वा त्रयाणां क्रमेण मंथनं कृत्वा मथित्वा मथित्वा त्रिषु मृन्मयश
रावपात्रेषु कृत्वाऽग्नीन्विहृत्य गार्हपत्यादिक्रमेण मथिताग्नीन्स्वस्वायतनेषु विहरेत् अग्नीनि क्षिप
देकाकाक्षिन्यायेन योज्यम् मतिमंथनं विहरणं तानुसमयो वा कार्यः पक्षान्तरे ताग्नीन्समारोप्योद
वसाय मथित्वा सकृदेव मंथनं कृत्वैधनकाष्ठशकलैर्मथिताग्निं संधुक्ष्य त्रिषु पात्रेषु समं त्रेधा विभज्याऽ
यं गार्हपत्योऽयमाहवनीयोऽयं दक्षिणाग्निरिति त्रयाणां निर्देशं कृत्वा अग्नीन्विहृत्य निर्दिष्टानग्नीन्स्वस्वा
यतनस्थानेषु संस्कृतेषु विहरेत् केचित्तु सकृन्मंथनपक्षे मथिताग्निं गार्हपत्यायतने संस्थाप्य संधुक्ष्य
तस्मादेवेतरयोरग्न्योर्विहरणं मन्यते मुक्तोपपक्षो याज्ञिकसंमतः वोधायनापस्तंबादीनां तु गार्हपत्येतरय

ग्न्योः समारोपादिषु दक्षिणाग्निपूर्वक्रमो ऽस्ति येन त्वाहवनीयपूर्वं सूत्रानुरूपमेतद्व्याख्यातं आ
५ पस्तंबः पृथगरणिष्वग्नीन्समारोपयते ये धार्यंत इति लौकिकेष्वाहवनीयदक्षिणाग्नीगार्ह
पत्यं श्रौतारण्योरजस्रपक्ष एवमिति शेषः एवं समारोप्य षडरणिपाणिरुदवसाय गार्हपत्या
दिक्रमेण स्वस्वारणिभ्यां मथित्वा स्वस्वायतनस्थानेषु विहरेत् गार्हपत्यं समारोप्याहरणं स्थापनः
एवमाहवनीयात् असंभाव्यं। उद्धृत्याहवनीयं यथा गार्हपत्यात्तारण्योर्वा एवमाहवनीयाद
पि नित्यधृतादन्यस्मिन् भाव्यं नित्यधृतादाहवनीयादन्यस्मिन् भाव्यं नित्यधृताद्वाहवनीयाद
न्यस्मिन्नरणिभांडे समारोपः पृथगरणिष्वग्नीन्समारोहयत इति यावंतो धार्यंते विज्ञायंते तद्धारणीभि
स्तावतीभिरिति संकर्षे संकर्षे न्यायमीमांसाद्वादशाध्यायादूर्ध्वमस्ति। आहवनीयवचनाद्दक्षिणा
ग्निर्निसद्धृतो ऽपि समारोप्यते। तयोरेवारण्योः अथ यदरण्योरग्नीन्समारोहयत इति श्रुतेः अनस्त ५
मिते च मंथनं भाव्यं अनस्तमिते आदित्ये यथा ग्निमंथनं भवति। चशब्दादनुदिते च एकयोनिसमारू
ढानां सकृन्मंथनं कृत्वाहवनीयदक्षिणाग्न्योरुद्धरणं आरण्यकेदर्शनात् मथित्वाग्नीविहरेति। तथैव

च्चाऽनयनं नित्यध्वतो नित्यध्वतत्वादिति। अथ पयुग्नयो युगपदनुगच्छेयुस्तदा श्रौतारणिभ्यां मथित्वा
प्राग्वत्समंत्रेधा विभज्य त्रिषु विहरेत् स्वयोनिपरंपरयाऽरण्योरनुगतत्वात् शतपथब्राह्मणे दर्शना
दिति केचित् गार्हपत्यानुगमने तु मंथनमेव तदितरयोरग्न्योर्द्वयोरन्यतरस्य वाऽनुगमने तु नर्याद्दाद्दा
यैव विहरणम् ततोऽधारणम् श्रौतारण्योः समारोपितेष्वेवेतरयोरग्न्योर्नर्यविहरणात्प्राक् पक्षे स्वां
शविभागो न सर्वदा युगपत्त्रयाणां द्वयोर्वाऽनुगमने किंतु गार्हपत्यं मथित्वा विहृत्य तस्मादेवेतर
ग्न्योर्नर्यविहरणात्प्राक् पक्षे स्वांशविभागो न सर्वदा युगपत्त्रयाणां द्वयोर्वाऽनुगमने द्वयोरन्यतर
स्य वा विहरणमित्यन्ये एतदेव युक्तमित्यपरे दक्षिणाग्नेस्त्वेतत् गार्हपत्ययोनिपक्ष एव इदं इतरयो
निपक्षे तु श्रौतारण्योः समारोप एव न भवत्यनुगमनेऽनुगमनं च तस्य स्वयोन्यंतरसंबंधेन पृथ
गेव निर्णयः तत्राऽस्माकं कात्यायनीयानां समारोपोपस्थितौ दक्षिणाग्नेर्दक्षिणसंहरणपक्षे नि
त्यो दक्षिणाग्निरित्युक्तेस्तस्य च नित्यध्वतत्वेनाधाने गार्हपत्यागारे निर्मथ्याभ्याधानपक्षेकर्मते
श्रौतारण्योरेव समारोपः प्रकृतारणिभ्यां मथितत्वेनैकयोनित्वात् ततश्च तदनुगमने उक्तं देवपा

न·स·स्·भा· द्विकमते त्वाधाने मंथनाऽभ्याधानपक्षेऽर्थाश्विमकाष्ठाभ्यां मथित्वेन तत्सत्वे तयोरेवाभावेऽन्ययोर्लौ
६ किकारण्योर्वा समारोपः अस्मिन्पक्षे आधानकाले उपात्तयोर्मंथनकाष्ठयोः समारोपार्थं सर्व
दा धारणं केचिदिच्छंति अनियम इत्यन्ये। दक्षिणाग्नेरनुगमने तु इयमेव स्वयोनिः इत्यग्न्यंतरसू
त्रेषु दर्शनात् वैश्यकुलादियोनिपक्षे तु लौकिकारण्योरेव समारोपः। अस्मिंश्च पक्षेऽनुगमने वैश्यकु
लादि स्वयोनित आनीय संस्थाप्यानादिष्टं कृत्वा तस्यैव धारणं। तदुक्तं विहारकालादन्यत्र यद्दान
र्मोऽनुगच्छति। मथितानर्मिसुखः स्याऽनादिष्टं तत्र हूयते नर्यमथितो वोढ्वा त्वनयोरुपस्थाने संस्थाप्येत्याद्यः
संस्थापितेऽग्नावनादिष्टविधानेन तस्य सर्वापित्वोक्तेः ननु धारणार्थं पुनर्मंथनमर्द्धस्थापनं वा अ
मुकार्थमेवायं संस्थापित इत्येवमध्यवसानाभावाच्च एवं सर्वत्र ज्ञेयं वस्तुतस्तु नित्यधृतानां सर्वदा
प्रत्यक्षत एव न यत्नं न समारोप इति वक्ष्यामः। अत्र त्वग्न्यंतरैपक्षांतरमप्युक्तमस्ति तद्ग्राह्यं प्रत्यात्मण ६
भावो
पन पक्षे सौकुर्यत्वादुपेक्षितं कात्यायनीयानामजस्रपक्षेपि धि शाम्नानात्सूत्रभाष्यादावाक्षेपतो क्रिये
पलेरव नादर्शनाद्वान्यत्राप्यजस्रपक्षे द्वादशरात्र नित्यधृतादावप्यत्र लिखितानुसरणं युक्तमिति युक्तं

प्रासंगिकं प्रकृतमनुसरामः तेनेदमग्नीन्विहृत्येति त्रयाणां विहरणमजस्रपक्ष एव ज्ञेयं किंत्वजस्रे
तरपक्षे मथित्वा गार्हपत्यमेव स्वायतने स्थापयेत् इतरथा विहरणस्य दृष्टार्थत्वप्रसक्तेः विहृते
षु धारितेषु सायंहोमादौ पुनर्विहरणाः प्रसक्तेश्च समारोपोद्वसानं च सत्रांगं न च तथेदानीं सर्वार्थं
विहरणं तथाविधवचनाभावात् पक्षे प्रदीपे कृत्तिके स्टे रेवाद्यै सर्वार्थविहरणस्य स्वीकृतत्वाच्चाम्
पिवौधायनविषयमेव तस्मादजस्रपक्ष एवेदानीमितराग्न्यो विहरणं भवति अपरे त्वंतरा गर्भिणी
न्यायेनाग्नीनिति बहुवचनमाहुः तत्रश्च कर्क मते । जस्रेतरपक्षे गार्हपत्य एव समारोपो याज्ञिक म
ते त्वग्नीनिति बहुत्वचोदनया त्रिष्वेति पथा स्वमत सूत्रार्थः अजस्रपक्षे विशेषमाह सूत्रं अजस्रा
न्वा वाशब्दोऽस्याजस्रपक्षावधारणार्थः वा अजस्रान्गार्हपत्याहवनीयदक्षिणाग्नीन् प्रत्यक्षानेव प्रपद्
द्य धनुष्याल्यांकृत्वा ऽऽशयोद्वसाय स्वस्वायतनेषु विहरेत् एतदजस्रधारिण एव ज्ञेयं न त्वितरेषां ।
नित्यधृतानां पत्रकर्मणि विहितेषु समारोपेषु सर्वत्र समारोपाभाव एवेति स्तत्र मेभाष्ये कर्कादिभि
र्निर्णीतत्वात् किंचित्वजस्रान्विहृतान्मथित्वा त्रिषु स्थानेषु स्वस्वायतनेषु स्थापितानेवाग्नीनूक

तिकेष्ट्यर्थं विहृताग्नेव वा यावत्तत्र समाप्तिं कृत्तिकेष्टिमारभ्य वैसवेष्टिपर्यंतं तानेवाग्नीन्धारयेत्। अ
७ स्मिन्पक्षे प्रकृतीष्टयनंतरं सोमे दीक्षणीयेष्टिवत् सत्रार्थं कृत्तिकेष्टावेव सकृदन्वाधानं व्रतोपायनं
च भवति तथा च प्रदीपे प्रथमदिवसे विहृतेष्वेवाग्निषु सर्वासां नक्षत्रेष्टीनां प्रागद्युक्तत्वादित्याहुः
अपरे त्वेतत् बौधायनविषयमेवेच्छंति बौधायनीये देवानंतरदेवप्रयोगे तु सर्वासु नक्षत्रेष्टिषु पृथक्कालत्वं
सद्यस्कालत्वं वा प्रथमेष्ट्यर्थविहृतेष्वेवाग्निषु सर्वा इष्टयः प्रतीष्टि विहरणं वेति यद्यपि प्रदीपे उक्तं
तथापि सद्यस्कालत्वं प्रतीष्टि विहरणं चोचितमिति न्यायविद इत्युक्तं युक्तं चैतत् सद्यस्त्वं का
कृत्तिरित्यादि कात्यायनसूत्रकर्कादिभिर्भाष्यकारैरप्येवमेव सिद्धांतितत्वात् याज्ञिकानां संप्रदायो
वि
पि सर्वे कृतिश्रुतयैवास्तीति अत्रायमनुष्ठानविधेः क्रमः भरणीयुक्तोक्तपर्वदिवसात्पूर्वेद्युश्चतुर्द
श्यां प्रातरग्निहोत्रहोमानंतरं समारोपार्थमग्नी विहृत्य विहृत्य वा त्रिषु गार्हपत्य एव वा समारोपं कृत्वाऽ
जस्रैः सह वोदवसाय ममथित्वा गार्हपत्यं स्थापयतेऽजस्रानेव वा स्वस्थायनेषु विहृत्य तत्रैव देवयजनांतरे करिष्य ७
माणनक्षत्रसत्रांगत्वमेसादिवद्धिरंगत्वपक्षेणे वसंकल्पपूर्वं गणेशपूजनादि पुण्याहवाचनांतं कृत्वाग्नि गर

स्वकर्मचकृत्वासपत्नीकइष्टमग्नित्वातत्रवसेत् द्वितीयादिप्रयोगेतुविघ्नेशपूजनमात्रमेव कालेऽग्नि
विहरणपूर्वंसायमग्निहोत्रहोमः भरणीयुक्तपर्वदिनेप्रातर्होमोत्तरं नक्षत्रसत्रमारप्स्यमानोऽ
न्वारंभणीयेष्ट्याहंयक्ष्य इतिसंकल्प्यप्रयोगेवक्ष्यमाणमुद्धरणाद्यन्वारंभणीयेष्टिंकुर्यात् द्वितीया
दिप्रयोगेप्यन्वारंभणीयाभवत्येव काम्यत्वात्तत्रस्य काम्यानांचपुनःपुनःप्रशस्यत इत्युक्तेश्च तत
उपसंहारेवक्ष्यमाणानांफलानांमध्येयत्फलकामस्तत्फलनामसंकीर्तनपूर्वममुककामः श्वःप्र
भृतिनक्षत्रसत्रेणाहंयक्ष्य इतिप्रधानसंकल्पंकुर्यात् प्रतीष्टिगतश्रुत्युक्तसर्वकामश्चेदन्नाद्यादि
कामइतिप्रयोगः अस्मिन्पक्षेकृत्तिकेष्ट्यादिषुप्रत्येकंप्रयोगेवक्ष्यमाणतत्तत्कामफलनिर्देशः ए
कस्यांकामनायांतुप्रधानसंकल्पेयत्कामफलनिर्देशः प्रत्येकसंकल्पेपितन्निर्देशएवोचितः तत
ऋत्विग्वरणार्हणेकुर्यात् ततोमधुपर्कः केचिन्मधुपर्कंनेच्छंति ततःप्रकृतीष्ट्युक्तंविहरणं कालेसायम
ग्निहोत्रहोमः सद्यःपौर्णमास्यंचेत्प्रतिपद्येवविहरणंपौर्णमास्यामारंभे अस्मिन्पक्षेउद्धरणपूर्वंसायंका
लेसायंहोमः श्वोभूतेप्रातः कृत्तिकायुक्तप्रतिपदिप्रातरग्निहोत्रहोमंप्रकृतीष्टिंचकृत्वाकृत्तिकानक्ष

त्रेष्ठे एरंभः कार्यइति अत्रपातिकाः चतुर्दशीसार्द्धैकोनविंशतिघटिकाः १९।३०।अमासपादाष्टाद
८ श १८।१५।भरणीनक्षत्रंचतुस्त्रिंशत् ३४।प्रतिपत्षोडश १६।दिनमानंसार्द्धद्वात्रिंशत् ३२।३०।यद्वाच
तुर्दशीपादोनपंचदश १४।४५।अमाष्टादश १८ भरणीनक्षत्रंत्रिपंचाशत् ५३।प्रतिपत्सार्द्धद्वाविंश
तिः २२।३० दिनंद्वात्रिंशत्।३२ अत्रत्रेधाविभागेनपर्वसंध्यभावाद्यागदिने भरणीनक्षत्रापाताद्बुकात्या
यनीयानामीदृशेविषयेसत्रारंभोनभवति।येषांद्विधाविभागेनसंधिरूपस्याभ्युपगमस्तेषामापस्तंबा
दीनांतुभवत्येव।एवंचतुर्दशीसार्द्धद्वादश १२।३०। भरणीनक्षत्रंषष्टिघटिकाः।६०। अमासार्द्धसप्तदश
।।१७।३०। अत्रभरणीघटिकैका १। प्रतिपद्द्वाविंशतिः २२। अत्रकृत्तिकानक्षत्रंषष्टिघटिकाः।६० सार्द्धषट्
६।३०। दिनमानंपादोनत्रयस्त्रिंशत् ३२।४५। यद्वात्रयोदशीसार्द्धषट्।६।३०।भरणीषष्टिः६०। चतुर्दशी
पादोननव।८।४५ अत्रभरणीत्रयं ३।अमापादोनदश।९।४५।अत्रकृत्तिकाःषट्।६। दिनंसार्द्धद्वात्रिं
शत् ३२।३०।ईदृशेविषयेप्यारंभोनभवति यदिचतुर्दशीषष्ठिः।६०।द्वितीयदिनेपिचतुर्दशीघटिकैका।१।पू ८
र्णिमासार्द्धपंच।५।३०।भरणीएकपंचाशत्।५१।प्रतिपन्नव।९।दिनंपादोनाष्टाविंशतिः।२७।[illegible]

।४५। अत्रापिप्रागवद्दारंभप्रयोगः। यदिचतुर्दशीचतुश्चत्वारिंशत्।४४। भरणीषष्टिः ६०। पूर्णिमापंचच
त्वारिंशत्।४५ अत्रभरणीचतस्रोप्यदिकाः।४। प्रतिपत्पंचाशत् ५०। कृत्तिकानक्षत्रंनवघटिकाः ९
द्विनसार्द्धसप्तविंशतिः।२७।३०। तदाऽन्वारंभोभवति। पर्वदिनएवभरण्युक्तरंसमारोपादिसर्वंभवति
। चतुर्दश्यांविष्टिपातसंक्रांत्यादिदोषेतुपर्वदिनेऔपवसथ्यंकृत्वाऽन्वारंभणीयादिकुर्यात्। एवंपर्वा
पिदोषाक्रांतंचेत्प्रतिपदिकर्मकालपर्याप्तव्याप्तिकानक्षत्रसत्वेप्रतिपद्येवप्रकृतिष्टेरनंतरंस १५
मारोपादिसर्वंकृत्वाऽनंतरंप्रथमेष्टेरारंभः। चतुर्दशीशुद्धा। अंतएपर्वदोषाक्रांतंतदाभूतेऔपव
सथ्यंकृत्वापर्वदिनेविरम्यप्रतिपदिप्रकृतिंकृत्वान्वारंभणीयादिकुर्यात्। अयंजघन्यः पक्षः। अयं
पक्षोनप्रचरतीत्याहुः। प्रसंगान्नक्षत्रेष्टीनांप्रागुक्तकालनिर्णयः। बौधायनीयेदेवानंतदेवप्रयोगे। अ
स्तमितेप्रचरेदितिविशेषविधिश्रूयते इष्टयः पूर्वाह्णएवानुष्ठेयाः। अतः पूर्वाह्णव्याप्त्येवतत्तन्नक्षत्रमु
पादेयं। ननुप्राकृतोवेरुतोवापर्वनिर्णयोनक्षत्रेष्वनुसर्तव्यः। पूर्वाह्णेवाथमध्याह्नेयदिपर्वसमाप्यतइ
त्यादिशास्त्रेनिमित्तांतर्गतपर्वग्रहणस्याविवक्षाकारणाभावेनपर्वकालोपपन्नेष्वपिनक्षत्रेषुपर्वनिर्णया

प्राते:॥ कृचिन्नक्षत्रे दिनद्वयेपि पूर्वाह्णव्याप्तौ तन्नाक्षत्रेष्टेः प्रथमदिन एवानुष्ठानं तत्र रनक्षत्रस्य तृ
६ तीयदिने पूर्वाह्णव्याप्तौ मध्यमदिने विरम्य तत्रैवानुष्ठानं। न चैवं श्वो भूतेमित्र्यापानुराधेभ्य इत्यादिसू
त्रविरोधः। श्वःशब्दस्यात्र नाक्षत्रदिनपरत्वात्। उक्तं हि नक्षत्रसत्राण्ययनानि चेष्टिहोमानि न कुर्याद्भ
गणात्मकेनेति। तृतीयदिने तद्व्याप्तौ तु मध्यमदिन एव प्रातरुपक्रमः। नक्षत्रेष्टिसमाप्तिः॥ कस्यचिन्न
बं क्षत्रस्य दिनद्वयसंबंधाभावे नद्वयोर्नक्षत्रयोरेकाहोरात्रव्यतिरेकेण पूर्वाह्णसंबंधाभावे इष्टिद्वयमपि
तत्रैवाहोरात्रे कार्यमिति। तथाप संदीपे न च पर्वसंधिवन्नक्षत्रसंधेर्निर्णयकत्वं। यदिष्ट्यापशुनासोमे
नयजेतत्सोमावास्यायांपौर्णमास्यांवायजेतेति विकृतिष्विवाऽविकृतौ सोमे त्वाष्ट पशौ च पौर्णमास्यमा
वास्यासंबंधो विधीयते। इमौ च शब्दौ वृत्तक्षणवाचिनौ। सूर्याचन्द्रमसोर्यः परो विप्रकर्षः सा पौर्णमा ६
सीयः परः संनिकर्षः सामावास्येति धूर्तस्वाम्यादयो पाद्दिष्टाकास्तदनुसारिणो हेमाद्र्यादयश्च ध
र्मशास्त्रकारा मन्यंते। क्षणस्य च प्रयोगाधिकरणत्वायोग्यत्वात्तदुपलक्षितमहरेव प्रयोगांगत्वेन विधे
यं। तुल्यं चेदमविकृतिपिंडपितृयज्ञांगामावास्याविधावपीति वदंतस्ते विकृतीष्टिपशून्यामविकृतिसो

मत्वा घ्रष्टपिंडपितृयज्ञादीनां घटिकामात्रे+त्रे+षपर्वदिनेऽनुष्ठानमाहुर्नचैतदपि मीमांसकामन्यं
ते पौर्णमास्या द्विरुएवदस्य कृत्स्नतिथिव्याप्तित्वमेव स्वीकुर्वंति। इति स्थितिः। नच कृत्तिकादिरुएद्धा अं
त्वक्षेण वस्यहोमत्रे सा विकृतिः कार्येति नु शास्त्रमस्ति। एवं सति स्थालीपाकविकृतिषु पर्वनिर्णयस्यतु
३+ णवाचिन इति किंचित्प्रमाणमस्ति। नवा केषांचिदभियुक्तानामभ्युपगमः। नच यद्विकृत्यंगत्वेनयः
कालो विहितस्तदंत्यक्ष+२ स्यत्वेपि चौलादीनां यथोदगयनापूर्यमाणपक्षे कल्याणनक्षत्राणां तत्र
दिष्टिप्रयोगाधिकरणत्वेनैव विधिरेवं प्रकृते पि कृत्तिकादीनां नक्षत्राणां तत्र दिष्टिप्रयोगाधिकरण
त्वेनैव विधिरिति कर्मकालत्व्यापि नामेव नक्षत्राणामिष्टिषु स्वीकरणमुचितं पूर्वाह्णो वै देवानामिति
शास्त्राच्चौलादिष्विव दर्शनवत्रतादिष्विव चैतास्वपीष्टिषु त्रेधाविभागस्थः पूर्वाह्न एव कर्मकाल इति
तद्व्यापितन्नक्षत्रेतन्नक्षत्रेष्टिः कार्या। कस्यचिन्नक्षत्रस्य दिनद्वयेपूर्वाह्णव्यापित्वेतु तन्नक्षत्रेष्टेः पू
र्वदिन एवानुष्ठानं। तत्परनक्षत्रस्य ततृतीयदिन एव पूर्वाह्णव्याप्तौ मध्यंदिने विस्पतत्रैवानुष्ठानं। श्वो
भूतेमित्रापोनुएधेभ्य इति सूत्रेच श्वःशब्दस्य नाक्षत्रदिनपरत्वान्नसूत्रेण तदनुसारि बौधायनीय

प्रदीपचंद्रिकादिग्रंथेषु विरोधः स्फुटः ॥ उक्तं हि । नक्षत्रसत्राण्ययनानि चैवं होमानेनेन कुर्याद्गणात्मकेने
१० ति क्षयवृद्ध्येनकदाचिद्द्वयोर्नक्षत्रयोरेकाहोरात्रमतिरेकेण पूर्वाह्ने संबंधालाभे इष्टिद्वयमपि तत्रैवा
होरात्रे कार्यमित्यौचित्यमिति । आपस्तंबीये केशवप्रयोगे अत्र केचित् यस्मिन्नहनि यन्नक्षत्रमावृ
त्तेनात्यागे वसमाप्यते तत्र तन्नक्षत्रेष्टिः कर्तव्या । यत्र तु पर्वाह्ने रात्रौ वा नक्षत्रसंधिस्तत्राऽपरेद्युर्न
क्षत्रेष्टिः । यतः पर्वस्थानीयं नक्षत्रं प्राधान्यादिति वदंति । तन्न । नक्षत्रेष्टीनां विकृतित्वात् संधिमत्येवाऽह
नि विकृत्यनुष्ठाननियमाच्च विकृतीरधिकृत्य भरद्वाजोप्याह संधिमत्येवाऽहनि सांगप्रधानानि संतिष्ठं
त इति । तस्माद्यस्मिन्नहोरात्रे यस्य नक्षत्रस्य संधिस्तत्रैव तन्नक्षत्रेष्ट्यनुष्ठानं एवं सर्वत्र नक्षत्रेष्टौ
नक्षत्राणां क्षयवृद्धिवशान्न्यूनाधिकतया यस्मिन्नहोरात्रे संधिद्वयमस्ति तस्मिन्निष्टिद्वयं यत्र चाहो
रात्रे संधिर्नास्ति तदहर्विरम्य संधिमत्येवाऽहोरात्रे तन्नक्षत्रेष्टिं कुर्यादिति प्रयोगकालनिर्णयः प्रयोग
मस्ति तस्मिन्निष्टिद्वयं यत्र चाहोरात्रे संधिर्नास्ति तदहर्विरम्य संधिमत्येवोपेतु पत्न्यामनालंबुकायां तामप १०
परुध्य तत्तन्नक्षत्रकाले तत्तदिष्टिं कुर्यात् यत्क्रांतमग्निहोत्रादि पत्न्युपेतं कर्म चोदितं आर्त्तवाभिप्लुतां भा

र्ये विहाय कुरुते द्विज इति गोभिलोक्तेः संकल्पोत्तरं त्वपरुध्यत तत्तत्सर्वप्रयोगं तत्तत्काले अनुष्ठेयं मदि
रज इति चातुर्मास्यप्रयोगे च शतदूषीव्याख्योक्तेस्तत्समानार्थमदीपोक्तेश्चात्रापि इक्योहत्वात् एवं
स्त्रीप्रसवे मासं पुत्रप्रसवे विंशतिरात्रमपपरुध्यैव याग इति देवानंतः केचित्त्रिरात्रमनपरुध्यैव
चिरम्प्य यजेते त्याहुस्तन्नेमिके एवः यतो नक्षत्रेष्टिष्वुत्तरभाविनीनां कासांचिदिष्टीनामुदिते चंद्रमसि प्र
चरेदहोरात्रयोः संधौ प्रचरेदुदिते पुनक्षत्रेषु प्रचरेदुदिते सूर्ये प्रचरेदित्यादिना तासां स्वे स्वे काले प्रधान
हविर्भिः प्रचरणविधानं। एतस्मादेव कारणात्सत्यामनालंबुकायांअनपरुध्ययाग पक्षे कृते तु प्र
हादूर्ध्वं कर्तव्यानामिष्टीनां स्वे स्वे नक्षत्रकाले स्व स्व प्रधानहविर्भिः प्रचरणं न घटते तस्मादपरुध्यै
व यजेतेति सिद्धं भवतीति ॥ कृत्तिकेष्ट्यादि वैश्वदेवेष्ट्यंतमेकं कर्मेत्युक्तं तत्रांतरा ऋत्विग्यजमानानां
मासाशौचं न प्रतिबंधाय। तत्तत्कार्येषु सत्रिप्रत्नीत्यस्मिन्नष्टादशे त्रिंशदुक्तेः याज्ञिकास्तु यजमानस्यैव न
प्रतिबंधाय न त्वृत्विजां। सत्रार्थंकृतेपि वरणे सोमवदृत्विक्पदहोपलक्षितं नात्र वरणं। किंतु व्यपदेशमात्र ए
वातेन त्विजामाशौचं प्रतिबंधायैव केचिन्न धुपर्के कृते आशौचं नेच्छंति। तन्न मधुपर्कोप्यृत्विक्पदोप

लक्षितविहितवरण एवोक्तः पारस्कराचार्येण षडर्घ्या भवंत्याचार्य ऋत्विगित्यधिकृत्य प्रत्यब्दसंव
११ त्सरस्येत्युपसंहारसूत्रेण तुल्यपदेश्ववरणे अतएवान्यत्रापि च स्मार्त्ततुलाकोटिहोमाद
वृत्विक्पदोपलक्षितवरणाऽभावान्मधुपर्कोहि पाकतारूतं मन्यंते निबंधकाराः तस्मादृत्वि
जांसा साङ्गोचैः न्यानाहूयते षांत्यपदेशं कृत्वा तैर्यागोनुष्ठेय इत्याहुः कर्माणि हि विधानि । वरणवं
त्यवरणवंतीत्यादिना विशेषस्तु त्रिंश म्लोष्यादौ ज्ञेयः । नियमानाह । सः हविरुच्छिष्टव्रतो यजमानो
भवति । प्रधानसंकल्पप्रभृति इस्त्र समाप्तिपर्यंतं यजमानो हविरुच्छिष्टव्रतः कर्मणि नक्षत्रेष्टिदेव
तानां चरुपुरोडाशादेर्विनियुक्ताऽवशिष्टस्य वाश्नी भवति । यजमानग्रहणं पत्नीव्युदासार्थं । हवि ११
ष्यं पत्नी भुंक्ते । अथ धर्मपत्नी व्रतचारिणा विभोस्पातां । यद्वाभावपि हविष्यमेवाश्नीयातामिति प्रदीपे या
ज्ञिकास्तु हविरुच्छिष्टस्याल्पत्वात्स्मार्त्ताग्निपक्व हविष्यान्नेन मिश्रयित्वाश्नीयादिति भक्तिविशेषमा
हुः नक्षत्रसत्रेष्टेतां नाम [illegible] त्विजामन्ययजमानस्यार्त्विज्यं निषिद्धं एवं चातुर्मास्यादिसर्वकर्मसु
ज्ञेयमिति प्रदीपे नक्षत्रसत्रेणेष्ट्वाऽपुनर्मर्त्तुं जपतीति शास्त्रांते आमुष्कामार्थं सत्रमुपदिष्टं । ताद

द्दीर्घकालीनं सत्रं कर्त्तुमसमर्थस्यायुष्कामस्य विशेषमाह ॥ सू.॥ अपि वा जन्मनक्षत्रे कुर्यादायुष्का
मस्याग्रयणधर्मो वा प्रयोगो जीवं तावाज्यभागौ यजत्यानो अग्ने सुचेतुना जीवसे। त्वं सोम जीवस इ
ति अपि वेति पक्षांतरपरिग्रहे। अपि वा आयुष्कामो जन्मनक्षत्रमतिमासं स्वजन्मनक्षत्रदिवसे स्वज
न्मनक्षत्रेष्ट्या यावज्जीवं यागं कुर्यात्। एवमपि कृते सार्वकालिको ऽपमृत्युपरिहारो भवति। अयं
मध्यमः पक्षः। आग्रयणधर्मो वा प्रयोगः। वा अथवा प्रतिसंवत्सरं ज्योतिःशास्त्रादृष्टप्रविष्टमासे पर्वदिने
स्वजन्मनक्षत्रे स्तगित तस्मिन्नेवाभावे ऽन्यस्यां वा तिथौ चंद्राद्यनुकूले तदभावे मासांतरेपि स्वजन्मन
क्षत्रदिने तन्नक्षत्रेष्ट्या त्रिस्त्रिवारमभ्यासेन प्रयोगस्तस्मिन्नेवाह्नि जन्मनक्षत्रेष्ट्या त्रिवारं प्रयो
गतंत्रभेदेन यागं कुर्यादित्यर्थः एवं यावज्जीवं प्रतिसंवत्सरं वर्त्तनीयं। अयं आग्रयणधर्मः कनिष्ठः प
क्षः। यद्वा कृत्स्नकृत्स्निरभ्यासेन यजेत। ततऊर्ध्वं यथाश्रद्धमिति गोपालः। शेषं निगदव्याख्यातं। कृत्ति
कानक्षत्रेष्टिमाह। सू.॥ अथ निर्वपत्यग्नये कृत्तिकाभ्यो जुहुं निर्वपाम्यग्निं कृत्तिका यजेति संप्रेष्यति अथ श्व
ः सत्रस्य प्रथमेष्टयारंभार्थे। निर्वपतीत्यनेन प्रयोगोपलक्षितः। कृत्तिकेष्ट्यादिषु कृत्तिका रोहिण्यादिषु

त्युक्तं तत्तन्नक्षत्रनामपदैः सगुणोपदिष्टानामेव देवतात्वप्रापणार्थं प्रयोगवचनं न तु केवलमग्न्यादि
१२ पदैः। स्विष्टकृतोनुवाचनात्पूर्वं वक्ष्यमाणोपदेशमार्थं संप्रैषवचनं। उत्तरसूत्रविहिताभ्यां चरुपुरोडा
शाभ्यां संचरदेवताहविर्भ्यां सह कृत्तिकानक्षत्रहविषा प्रागं कुर्यात् उद्धरणादि कर्मापवर्गांतां कृत्तिके
ष्टिं कुर्यादित्यर्थः। एवं रोहिण्यादिष्वपि ज्ञेयं। अग्निर्वा अकामयत। अन्नादो देवानां स्यामिति। स एतमग्न
ये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपदित्यादिश्रुतत्वात् अत्राहुः प्रांचः सोमपाजिकेग्रंथाः। अग्ने
हव्यं रक्षस्वाग्ने कृत्तिका हव्यं रक्षस्वानुमते हव्यं रक्षस्वेत्युपस्थानं। न त्वग्ने कृत्तिका हव्यं रक्षस्व
मिति। अग्नेः कृत्तिकाः प्रजापते रोहिणी सोमस्येन्वका इत्यादयस्त्वाग्नादीनां कृत्तिकादयो विशेषणत्वेनोक्ताः
अतोग्न्यादिरेव देवता। ननु नक्षत्रेष्टय इति व्यपदेशाद्वैपरीत्यमेव किं न स्यात्। उच्यते। आग्नेयमष्टा
कपालं निर्वपतीत्यादौ सर्वत्राग्नेरेवाष्टाकपालपुरोडाशसंबंधदर्शनादिहाप्यष्टाकपालस्य श्रुतत्वाद १२
ग्नेरेव देवतात्वं। एवं मृदेशं गतरे सोमापवनस्य तमेव श्यामाकं चरुमिति सोमो दैशेन श्यामाकास्तद्दीय
चरुश्च दृष्टः। इहापि स एतं सोमाय मृगशीर्षाय श्यामाकं चरुमिति श्रुतं। सोमस्यैव देवतात्वं गमयति
अतः

एवं सवित्रेऽसत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणामिति प्रदेशान्तरे श्रुतं इहापि सवित्रे ह
स्ताय पुरोडाशं द्वादशकपालं निरवपदाशूनां व्रीहीणामिति श्रूयते। एवमन्यत्र बृहस्पतये वाचस्प
तये नैवारं चरुमिति श्रुतमिहापि स एतं बृहस्पतये तिष्याय नैवारं चरुमिति श्रुतं। किंच। अग्निर्नः पा
तु कृत्तिका इत्यत्र पाक्षिकस्यैकवचनान्तस्य कृत्तिकाभिरभिसंबन्धानः अग्निर्नो देव इत्यादियाज्यानुवा
क्ययोरग्निप्राधान्याभिप्रायेणैवैकवचननिर्देशोऽतोऽग्निरेव देवता कृत्तिकादेर्गुणत्वं। नन्वेकवचनां
तस्य बहुवचनान्तानामग्निकृत्तिकानां कथं विशेषणविशेष्यभावः। उच्यते। अग्निभ्यः कामाय पशूना
लभन्ते स एतामग्निर्वशामादित्येभ्यः कामायालभत इत्यादौ बहुवचनान्तैकवचनान्तयोर्विशेषणविशेष्यभा
वदत्राप्युपपत्तेः। ननु चाग्नीषोममित्रावरुणेन्द्राग्न्यादिद्विदेवत्यत्वं कस्मान्न भवति। उच्यते। अग्नी
षोमीयं वै कृतं चतुःस्वरं द्व्यूतन्यूनमैन्द्राग्नवैकृतमिति वचनेन त्रुतः स्वरस्तु तु स्वरश्चतुःस्वराधिक
मग्नीषोमीयविकारं त्रिःस्वरं त्रिःस्वरन्यूनमैन्द्राग्नविकारमित्युक्तत्वादत्र च देवतापदं नक्षत्रपदयोः
सर्वत्र स्वरगणनायामनेकस्वरसम्भावात्सर्वमग्नीषोमविकारमेव स्यात्। नन्वस्तु का हानिरिति

चेन्न अग्निर्वा अकामयतेत्यस्या इष्टेरन्नादत्वरूपकं काहानिरिति चेन्न। अन्नादो भूयासमिति हुतानुमंत्र
१३ णमिष्यते अस्या अग्नीषोमीयविकारत्वेन। वृत्रहा भूयासमिति स्यात् तद्वानिष्टं। किंच। अग्नीषोमीयवि
कारत्वे मंत्रेणाभिघारणं यज्ञोसीत्यभिमर्शनं तथा विरुद्धप्रायश्चित्तं चतुर्द्धाकरणमित्येवमादि न भवेत्।
किंच तावेतमिंद्राग्निभ्यां विभागं ख्याभ्यामित्युक्तैकादशकपाले अग्नीषोमीयविकारत्वेमोनः कनीयवैशेषि
कं हविरभिमर्शनं न स्याद्धुतानुमंत्रणे च इंद्रियाव्यन्नादो भूयासमिति न स्यात् वृत्रहा भूयासमिति स्यात्।
अपि च। आदित्यार्यमविश्वेदेवा पूष्णां यथा लिंगना मंत्राभिमंत्रणमपि न स्यात्। किंच अग्नीषोमाविंद्राग्नी
मित्रावरुणावित्यादिद्विदेवत्यानां समस्तपदप्रतिपाद्यत्वदर्शनात्तत्र चाग्नेः कृत्तिकाः प्रजापते रोहिणी सोमस्ये
न्वकास्तथा अग्नये कृत्तिकाभ्यः प्रजापतये रोहिण्यै सोमाय मृगशीर्षायेत्यादावसमस्तपदप्रतिपाद्यत्वेन द्वि १३
देवत्यत्वानुपपत्तेः भिन्नपदप्रतिपाद्येषु तद्दर्शनात् अतो न द्विदेवत्यत्वं नक्षत्रेष्टिव्यपदेशस्तु नक्षत्रस्य
विशेषणत्वेप्युपपद्यते। पवमानेष्टिव्यपदेशवत् तत्रापि हि पवमानपावकशुचित्वादिगुणवतोऽग्नेरेव देवता
त्वं अतोऽत्राग्नेरेव देवतात्वं न कृत्तिकादीनामिति सिद्धांतः तेनाग्नेः कृत्तिकाहव्य ६ रक्षस्वेत्यादि सर्वसंस्का

रेष्ठुद्देयमिति आपस्तंबानुसारिप्रयोगकाराऽदेवाऽनंतदेवपंडितानयास्तु केश्च बुसिद्धंतितं प्राचीनं
मतं दूषयंति। तथाहि। केचिदग्न्यादय एव देवता न कृत्तिकादयः केवलाग्नेरष्टाकपालदेवतात्व
स्य केवलसोमस्य श्यामाकचरौ केवलसवितुर्द्वादशकपाले देवतात्वस्यान्यत्र दृष्टस्येहाप्यनुस
रणौचित्यात् अग्नेः कृत्तिकाः प्रजापते रोहिणीत्यादिवाक्येष्वग्न्यादीनां प्राधान्यप्रतीतेश्च अग्नि
र्नः पातु कृत्तिका इत्यत्र पात्विति प्रार्थनायां सुविते दधात्वित्येकवचनाभ्यामग्निप्राधान्यप्रतीतेश्च।
अग्नेः कृत्तिकानां च देवतात्वे प्रातिपदिकस्वरूपाणां पंचत्वेनाग्नीषोमीयविकारत्वमस्या गस्यसा
त्तत्त्वश्चाग्न्यादेर्भवतीत्यर्थवादसंवादपन्न्याद्यनुमंत्रणं नस्यान्स्याच्चैवं तर्ह्यनुमंत्रणं तच्चाग्नीषोमीय
वद्द्विदेवत्यत्वं समासाभावात् पवमानस्यश्चतुर्धाकरणांता आग्नेयधर्माः विशेषेष्टयामैंद्राग्नेऽपि
पुरोडाशेऽत उक्तन्यायेनाग्नीषोमीयविधर्म्यं तत्त्वाच्चानिष्टमापद्येत नचाग्नीषोमीयवद्द्विदेवत्यत्वं समासाभा
वात्। पवनत्वस्याग्निगुणत्वमात्रेण पवमानेष्टिरिति व्यपदेशवन्नक्षत्राणामग्न्यादिगुणत्वेन नक्षत्रे
ष्टिव्यपदेशोपपत्तिः। नच भिन्नवचनांतयोरग्निकृत्तिकाशब्दयोर्विशेषणविशेष्यभावसंभवः अग्निर्न्यः

कामायपश्रूनालभत इतिताद्दृश्योरपिविशेषणविशेष्यभावदर्शनात्। अतोऽग्नेकृत्तिकाहव्यंठ·र
१४ क्षस्वेत्येवोहोनतुकृत्तिकानुरोधेनरक्षध्वमित्याहुः तन्नमनोरमं भिन्नार्थतयाप्रसिद्धाभ्यांविधि
गताभ्यांभिन्नचतुर्थ्यन्ताभ्यांदेवतयोः समुच्चयप्रतीतेर्दुरपह्नवत्वात्। त्वष्टुपत्नीवतोरेकार्थत्वेपि
त्वाष्ट्रंपात्नीवतमालभतेत्यत्रतद्धितभेदाद्देवताभेदइत्यान्यायविदः। भवदुदाहृताग्नेः कृत्तिकाइ
तिवाक्यात्मस्यख्यातभिन्नत्वेननिर्णीतयोश्चतुर्थीभेदेकथमिवनदेवताभेदः। नचधर्मनिर्णयेक
थमिवनदृष्टानुसरणंयुक्तं। सामान्यतोदृष्टस्यैवधर्मेनप्रामाण्यमित्यस्यहृज्जेमिनिप्रभृतिभिरुक्तत्वात्
। नचमंत्रानुरोधेनविधेर्नयनमुचितंकेवलाग्निप्रकाशकमनोतामंत्रवशेनपश्चादावपिकेवलाग्नि १४
देवतात्वापत्तेः एकवचनांतपाठवत्त्यादिविपरिणामस्यकृत्तिकान्वयसंभावाच्च दृश्यतेचनक्षत्रदेवत
योर्मंत्रेष्वोपिपृथक्देवतात्वं। धनिष्ठेष्यांपहुंनः पातुवसवः पुरस्ताद्दक्षिणतोभिपंतुश्रविष्ठाइतिप्राज्या
हे मंत्रेभिन्नदेशीयभिन्नक्रियान्वयित्वेनपूर्वार्द्धेउभयोरपिस्वातंत्र्यस्यदृष्टत्वात् उत्तरार्द्धेतुनक्षत्राद्देवफ
लप्रार्थनयातस्यैवप्राधान्यप्रतीतेः तथाश्वततारकेष्वयांनक्षत्रस्यएजेत्यनुवाक्यायांवरुणंशतभिषक्

जंघ पृथक्स्वातंत्र्येण निर्दिश्यते तौ देवेभ्य इति प्रति निर्दिष्ट भेषजानां प्राप्तिस्तदधीना निर्दिश्यते यद्वन्न इ
तिपाज्यापामपि वरुण त्रात भिषजो: पृथङ्निर्देशो भेषजप्राप्तेस्तदधीनत्वं तुल्यं। एवं सति कथं त्रपा
णामेकदेवतात्वं। किंच। तदिंद्राग्नी कृणुतां तद्विशाखे इत्येक कपालस्थानामभेदेन द्विः प्रार्थनं। कृष्णा
स्म हव्यैर्नमसोपसद्येत्यनुवाक्यायामित्रस्यानूराधानां प्रत्येकं हविः संबंधप्रकाशनव्यवस्थयाभिन्न
फलप्रार्थनं चैंद्राग्न्यज्येष्ठामधुमद्दुहानेत्यत्र च नक्षत्रस्यैवैंद्रं प्रति हविः प्रापकत्वं यजमाने फलधातृ
त्वं च कथं नक्षत्राणां स्वातंत्र्येण देवतात्वाभावे संगच्छते पात्नीवतग्नहे पत्नीवतस्त्रिंशतं त्रींश्च देवा
निति याज्यामंत्रे त्रयस्त्रिंशद्देवानामिवेंद्रस्यापि न देवतात्वमिति हि मंत्रात्प्राप्यते। तत्त्विंद्राग्न्यज्येष्ठाया इति
विधिगतचतुर्थी भेदेनापोद्यते एवं सति मंत्रेण कचिन्नक्षत्रस्य स्वातंत्र्येण देवतात्वाभावप्रतीतेरप्यिज्या
पमानायाः कथं नापवाद इति सुधियः आलोचयंतु। किंच। एवं विष्णुप्रकृतासु अग्नये स्वाहा कृत्तिकाभ्यः
स्वाहेत्येवं विहिताघमंत्रद्वकरणकहोमयोः पृथुपुरोडाशवलधानदेवतासंस्कारत्वेन संनिपत्योपकार
कत्वं प्रतीयते तन्निर्वाहाय पेष्टिविधिषु ताभ्यां ताभ्यां चतुर्थ्यंताभ्यां पृथक् देवतासमर्पणमेव वक्तुमुचितं।।

अन्यथास्विष्टयजुर्होमवदनेकस्वाहाकारयुक्तेनमंत्रेणैकाहुतिःस्यात्।एवमुपकारिणोवाहोमौ नचेत
१५ त्सुहृदयमारोहति अतएवाऽहोरात्रेष्टौसाहित्याविवक्षामंगीकृत्यैकस्यापि चतुर्थ्याहृत्योर्देवतयोः समर्प
णमंगीकार्यं। अह्ने स्वाहा रात्र्यै स्वाहेति होमयोः संनिपातित्वार्थं किंच श्रुतिभाष्यादिषुप्रतिष्टिदेवतयोः
समुच्चय एव प्रतीयते। तथाहि तत्रकृत्तिकेष्टिपुरोनुवाक्यायांयाः सप्तकृत्तिकाअंबादुलेत्येवमाद्यास्तद्रूपं
नक्षत्रंतस्मात्स्यादितिव्याख्यायआसांकृत्तिकानांतदुपलक्षितस्याग्नेश्च आसन् आस्येमुखेविचक्षणंवि
विधप्रकारसाधनभूतंहविर्जुहुतेतिव्याख्यातं। तथा। मृगशीर्षेष्टियाज्यामंत्रोत्तरार्द्धे च तस्मैनक्षत्रायपतेतु १५
भ्यंचहविषापरिचरेमेति अभेदविवक्षायांतदभिन्नायतुभ्यमितिवदेन्नवदेद्वाचकारः। तथाआर्द्रेष्टियाज्या
मंत्रोत्तरार्द्धेचतस्मैनक्षत्रायतेतुभ्यं यांतोरुद्रंआर्द्रांचेति। तथापुनर्वस्विष्टियाज्यायामेवानदेव्यदितिरनर्वे
त्यत्रनकारः पुनर्वसुभ्यांसमुच्चयेनवर्त्तत इतिवलाद्वृत्तासमुच्चयेभाष्यकारैर्याज्याप्रकारत्वमा
नीतमितिप्रतीयते। पुष्येष्टियाज्यायांईयोश्चव्यवस्थितफलदातृत्वेन [illegible]धारणफलदातृत्वेनचोभ
योः पुष्यबृहस्पत्योस्तुल्यप्रकारेणमुक्तवान्। आश्लेषेष्टियाज्यायांचतेभ्यःसर्वेभ्यइत्यनंतरमाश्लेष

देवताभ्य इत्यनंतरोपस्थितनक्षत्रवाचिपदाध्याहारं कृतवान् एवं विशाखेष्टौ दौ विशाखे अधि
पत्नी इंद्राग्नी च देवाविति यथा मंत्रलिंगे देवताभेदमेव दर्शितवान् क्वचिन्नक्षत्रस्य क्वचिदधिष्ठा
तुरेव यथा मंत्रलिंगं प्राधान्येन प्रकाशनं तु तदनुसृतमपि तद्विधिगतचतुर्थीभेदबोधितं देवताभेदं बाधि
तुमिष्ट इति प्रागेवोक्तं। तथा ब्राह्मणभाष्योपक्रमेपि सर्वेष्वनुष्ठास्मिन् कल्पे वर्तमानानां नक्षत्रस्वा
मिनोऽग्न्यादेः कृत्तिकानक्षत्रस्य च मिलित्वा पुरोडाशमष्टाकपालं निर्वपेदिति देवतयोः समुच्चयं भाष्येष्टौ
व्यवहरन् भाष्यकारः सर्वत्र तुल्यन्यायतया द्वैवतयोः समुच्चयमेव द्रढयति तथा आश्लेषेष्टिब्राह्म
ण व्याख्यावसरे भाष्यकृतोक्तं। असुरैः सह युद्धे युक्ता देवाः असुराणां स्ववशीकरणाय इदमिश्र
सक्तुरूपं मंथं करंभशब्दाभिधेयं निरूप्येताभिः सर्पदेवताभिराश्लेषनक्षत्रदेवताभिश्च करंभतुष्टा
भिस्तान् असुरानुपानयन्नुपसमीपं प्रापितवंत इति। अत्र प्रत्येकं देवतापदप्रयोगेण हविःसंबंधसंकीर्तने
न चकारेण च द्वैवतयोः समुच्चयः स्पष्टो दर्शितः। एवं च प्रतीतिद्विदेवताकारकानेकत्वेन देवतानक्षत्रयो
र्न ह्यपि व्याप्यासज्जवति देवतात्वमिति। प्रथमदेवत्ये कदेवत्यत्वं द्वितीयया नेकदेवत्यत्वमिति सा

द्रव्यानेकविधत्वात्समस्तकौ किंमयुक्तं स्याद्द्रव्येणातिदेशः कस्मान्नीपद्रव्यपेक्षायां जघन्य द्वे वर्तपोक्तदेवत्य
१६ त्वं हितापप्यानेकदेवत्यत्वमिति कृतस्याद्रव्यो मुख्यस्याद्रव्यपाच्चुबलीयः। अधिष्ठेयस्याद्रव्यस्याद्वाधिष्ठातस्या
द्रव्यं वा द्रव्यगुणोक्तदेवताविग्रहस्यामेन वलीय इति कृत्तिकेष्ट्यामाग्नेयविध्यंतस्य विशाखेष्ट्यामैंद्राग्न
विध्यंतस्य नियमसिद्धिरिति सर्वेष्टिषु प्रथमदेवतात्वाधिष्ठानत्वसंख्यात्तदक्षरसंख्यानिमित्तस्याद्रव्य
निमित्तातिदेशावलंबेनोक्तप्रयोगोपपत्तिरित्यलं। अतो ग्ने कृत्तिका हव्यं रक्षध्वमित्येवोहः एवं सूत्रचा
केपि जुषंतेति एवमन्यत्राप्यूह्यमिति। याज्ञिकास्तु प्राचीनमतमेवांगीकुर्वंति कृत्तिकादिसप्तविंशत्यष्टि
साधारणमिदमाह सू०। आग्नेयमष्टाकपालमनुमत्यै च चरुं सर्वत्रानुषजति नक्षत्रहविर्मध्ये श्रपयित्वा
साद्यपति। आग्नेयः पुरोडाशः पूर्व। मध्येन क्षत्रहविः। अनुमतिचरुरुपरिष्टादिति। एवं सर्वासु वेदितव्यं स १६
र्वत्र कृत्तिकादि सर्वास्विष्टिषु चरुपुरोडाशौ अनुषजति नक्षत्रहविरनुसहसजति संचरतीत्यर्थः। चरु
पुरोडाशयोः सर्वास्विष्टिष्वनुषंगविधानादनयोः संचरहविरिति व्यपदेशः। नक्षत्रहविरिति नक्षत्रेष्टि
ष्वप्र इतरेष्टिहविषामप्युपलक्षणार्थं। श्रुतौ याज्यानुवाक्याम्नानक्रमे वैष्णवमंत्रयोरंते संचरदेवत्ययोर्म

आम्नानात् तेनकृत्तिकादिसप्त[illegible]त्रिंशत्सु संचरद्देवतयोश्च रयिपुष्ट्योराज्यभागौ भवतस्तेवेत्यवसीयते। श्रपणासादनेतु मध्याज्यप्रधाने तत्रविषयेतत्रैवे।मध्याज्यप्रधानस्यतु ध्रुवापात्र एवपात्रः आहवनीयप्र जतयो ध्रुवायाइत्युक्तेः त्रयाणांच समभाधान्यमेव अतोऽन्यत्र रस्यांतरापेतदन्यावकृतिः अंगिलो पेपुनः क्रियेतेतिवचनात् संचरद्देवतयोरप्यंगित्वमेव किंतु तयोर्नक्षत्रदेवताभ्यां अभितः कर्त्त व्यता मात्रं विशेष इतिभारद्वाजस्तोमपात्रिकेशवाः एवंसर्वेष्टिसाधारणं निर्वापादिहविरासादनांतं प्राकृतमुक्त्वाऽधुनाक्रमप्राप्तं सर्वेष्टिसाधारणं हौत्रमुपदिशति॥सू०।तस्याः सप्तदश सामिधेन्यः स मिध्यमानां समिद्धां चांतरेण श्रीमत्सो धाय्ये दधातिस्वारुहायस्सश्रियोहवे। अद्याभ्यः पुर एते तिरयि मंतौ पुष्टिमंतावाज्यभागौ यजति।तस्या इतितच्छब्देन पूर्वसूत्रविहितेष्टिपरामर्षः।एकत्वमविवक्षितंकृ त्यतासांकृत्तिकादिसप्तत्रिंशदिष्टीनांसप्तदशसामिधेन्य इत्यर्थः।पुष्टिमंतौ वेति वाशब्दोऽवधारणा र्थः शेषं निगदव्याख्यातं।श्रीमत्सोधाय्यमोः कृत्स्नमंत्रपाठमाज्यभागानुवाक्येचप्रयोगे वक्ष्यामः॥ सू०।संचरयोर्याज्यापुरोनुवाक्यानक्षत्रहविषामग्निर्नः पातुकृत्तिका इति यथासमाम्नातं।तेतिरीयब्रा रपुष्टिमंतौ मित्रविंदायां॥रयिमंतावश्वमेधे सावित्रेष्टौ॥पुष्टिमंतयोरेवरयिमंतत्वाभ्युपगमा र्थो मंत्रयोः पूर्वरयिलिंगाद्रयिमंतौ पुष्टिलिंगात्पुष्टिमंतावितियोगप्रणीत॥रयिपुष्टिलिंगप्र

प्रयोगेणोभयलिंगदर्शनादन्यतरलिंगमंतयोः पृथगनुवाक्यान्नाभावाख्य॥यावेवपुष्टिमंतौ तावेवरयिमंतावित्यर्थः॥२

ह्मणेतृतीयाष्टके प्रथमप्रश्ने यथासमाम्नातं यथा कृत्स्नमंत्रपठितं हौत्रं विज्ञेयमित्यर्थः प्रतीकोपादानं
१८ कृत्स्नोपलक्षणार्थं। विशेषस्तु परिगृहीतकृत्स्नहौत्रपक्षेपि याज्यानुवाक्यामंत्रेषु यथासमाम्नातोऽनु
स्वारस्थाने ॐकारस्यैव पाठः। तथा वाक्यकारैः परिपठितानां याज्यानुवाक्यामंत्राणां मध्येऽनुस्वारं ता
नां वाक्यानामध्यर्थमर्थे रेफोष्मसु परतो याज्याद्यौदितीयांतानां देवताविशिष्टनक्षत्रपदानां चैवं
याज्याभिर्मिथो दैवतर्क्षपदानां च संधिकरणं च ॐकारेणैव। उक्तं च। सूत्रं। ॐश्वं दसि। ॐ दसि अनु
स्वारे ॐकारमापद्यते शषसहरेफेषु परतः। पृथिव्यां शतेन। पृथिव्यांॐ शतेन। आमूं ॐ षि। हंसः। ह
ॐ सः। शुचिषत्। शतं हिमाः। शॐ हिमाः। मन्युं। राजानं। मन्युॐ राजानमिति। आपस्तंबीयप्रातिशा
ख्येऽनुस्वारस्य ॐकारविषये परे विशेष उक्तो यथा नवमे सूत्रं। अनितिपरोग्नहोरस्य याज्यापृष्ठ्य
हिरण्यवर्णीये व्यीकारउकारपूर्वो रेफमाकारपूर्वश्च यकारं। ग्नहोरस्य पृष्ठ्यहिरण्यवर्णा इत्यास्वाद्या १८
अनुवाकास्तेनितिरिति पदस्यास्वा याम ध्येत प्रसिद्धः। याज्येति पदमनुवाक्यानामप्युपलक्षकं। ग्नहोरस्य
पृष्ठ्यहिरण्यवर्णा याज्यानुवाक्यासु अनितिसूत्राव्यवहितहित्वप्रक रणस्य नकारश्चेति पूर्वसूत्रगतोऽनिति
सूत्रेग

तश्चकारात्कृष्टः पदांते वर्त्तमानो नकारोऽनिति परः। इति परो यस्मादसाविति परः। न इति परोऽनि
तिपरः। चेन्नकारोऽनितिपर ईकारपूर्व ऊकारपूर्वो वा तर्हि रेफमापद्यते नकारस्थाने रेफो भवति।
यथा। येवा वनस्पतीन्। अनु इत्यत्र। वनस्पतीरं। अन्विति। ऋतूं पते इत्यत्र ऋतूरं। ऋतुपत इति। आका ऋतूनऽ
रपूर्वश्चेद्यकारमापद्यतेऽनिति परे। नकारस्थाने यकारो भवति। यथा। मधुमान्। अस्तु सूर्य इत्यत्र
मधुमाय् अस्त्विति। एवं नकारस्थाने परे रेफादेशे सिद्धेऽनंतरमादेशात्पूर्वस्वरोऽनुनासिको भवती
त्याह पंचदशे सूत्रे। नकारस्य रेफोष्मयकाराभावात् लुप्ते च मलोपाच्च पूर्वस्वरोऽनुनासिकः। नकारस्य
रेफभावात् ऊष्मभावात् यकारभावात् लुप्ते चेति चकारात् सन्निकृष्टो यकारो गृह्यते। नकारस्थाने जा
तस्य यकारस्य लुप्तेश्च सति। मलोपाच्च। क्वचित्पदांते वर्त्तमानस्य मकारस्यापि लुप्ते च पूर्वस्वरोऽनुनासि
को भवति। तत्र नकारस्य रेफभावस्योदाहरणे उक्ते। ऊष्मभावः प्रपंच्यते। पान्। च। विघ्नपान् उच्चन इत्य
त्र। नश्छव्यप्रशान् खरवसानयोर्विसर्जनीयः। विसर्जनीयस्य सः। स्तोश्चुनाश्चुः। एवं पाँश्च विघ्नपाँ उच्चने
त्यूष्मभावः पाणिनिसूत्रचतुष्टयसिद्धः। एवं कर्णान् च। अकर्णान्। च। इत्यत्रापि कर्णाँश्च। अकर्णाँश्चेति सि

इ॰ यलोपस्सूक्तो दशमे। सूत्रं। लुप्येतेत्त्ववर्णपूर्वौ यवकारौ। स्वरपरावितिशेषः। यथा॥ आपडंदंतु। धुवाअ
१८ स्मिन्गोपतौस्यात मस्मिं॰ आविवेश। तुशब्द इतरेयवौ निवर्त्तयन्नादेशप्राप्तयोरेवाऽनयोर्लोपविष
यत्वं घोतयति। अवर्णः पूर्वो याभ्यां तावर्वणपूर्वाविति। मलोपो प्युक्तो द्वितीयाद्ये। सूत्रं। अथमकार
लोपो रेफोष्मपरः। रेफपरऊष्मपरश्च परयोः तो मकारो लुप्यते॥ यथा॥ प्रसुष्टम् रक्षरुत्यत्र मतुष्टं रक्ष
इति। समूशितम्म इत्यत्र सौंशितम्म इति। एवंत॰ षडहानि। स॰ स्मि घुक्से। तु॰ हृयधाविष्ये त्यादि
। अस्माकं कात्यायनीयप्रातिशाख्येतुमकारस्यैवाऽनुस्वार आदेश उक्तस्तुरीयाये। अनुस्वार॰ रोष्मसु
मकार इति एवं नकारस्य रेफभावा घुक्तविषये मलोपाच्च पूर्वस्वरस्याऽनुनासिकत्वे सिद्धे मतांतर माह।
सूत्रं। नैकेषां। एकेषां मते पूर्वसूत्रोक्तेषु नानुनासिक्यं भवति उक्तान्येवोदाहरणानि। इदमेवेष्टसूत्रं न पू १८
र्वसूत्रं एवं मतद्वयेसिद्धे स्वेष्टमतं द्योतयति सूत्रं। ततस्त्वनुस्वारः। तत इति सर्वनाम्नापरामृष्टास्व
रस्य रेऽनुस्वारागमो भवति। यथा॥ त्री॰ रेकादशा॰ इह। परामृष्टस्वरस्याऽनुनासिकगुणं तुशब्दो निवर्त्त
यति। तस्मादनुनासिकप्रतिषेधपक्ष एवाऽयमनुस्वारागम इति। उदाहरणेषु॰ कारस्तेस्वं वक्ष्यमा

णस्तिद्धं। एवं पूर्वस्मात्स्वरात्परोऽनुस्वारागमे सिद्धेऽनंतरमनुस्वारस्य ꣳकारो भवतीत्याह। अध्या
येत्तैत्तिरीयाणामनुस्वारे यदा भवेत् तदाध्यर्द्धो गकारः स्यादितरस्त्वनुनासिकः। इति भैरवकृते
वर्णक्रमदर्पणे व्यासशिक्षावचनं। अस्यार्थः। तैत्तिरीयो यजुर्वेदः तैत्तिरीयाणामध्याये यजुर्वेद इ
त्यर्थः। अनुस्वारे यदा भवेत्। यस्मिन्प्रदेशेऽनुस्वारो भवेत् तदा तस्मिन्प्रदेशेऽनुस्वारस्याध्यर्द्धो गका
रः स्यात्। अपरोऽर्द्धस्त्वनुनासिकः स्यात्। यथा नविसꣳसयति। शोꣳ सामोदइवेइँति। तैत्तिरीयग्रह
णमृगादिव्यावृत्यर्थं। कात्यायनीयाष्टाध्याय्यपरिशिष्टसूत्रांतर्गतप्रतिज्ञासंज्ञकतृतीयपरिशिष्ट
तो भिन्नेऽस्माकं माध्यंदिनीशाखापुरस्कारेणैव कात्यायनकृते त्रिकंडिकात्मके प्रतिज्ञासूत्रपरिशि
ष्टे त्वन्यो विशेष उक्तो यथा। अनुस्वारस्य ꣳमित्यादेशः शषसहरेफेषु तस्यैव त्रैविध्यमाख्यातꣳ ह्र
स्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घो गुरौ परे गुरुः। परसवर्णेषत्वकृत्स्याचान्यत्रेति। सूत्रा
र्थस्तु हाहम् णानि चाऽनंतयाज्ञिककृते भाष्ये द्रष्टव्यानि। विस्तरभयान्नेरत्र नोच्यंते। एवं चाऽत्रशो। विष्फुरा
स्तमीमहोꣳखारुहाप्स। तूर्णी रथः सदानवोꣳ समिद्धो अग्ने। त्वꣳ सोम महे किंचक्षणꣳ हविरसं

॥अभयं कृणुतां ॐ सुवीर्यस्य। अभ्येति चित्रा ॐ सुभगं सं। उपयाता ॐ शुभं। रुद्रमार्द्रा ॐ हेतीरुद्रस्य॥
मित्रमनूराधा ॐ श्रवित्रं नक्षत्रं। विष्णु ॐ श्रोणा त्रेधा विष्णुः। वरुणं ॐ शतभिषजं भेषजादिय ह्रन्नो
१९ राजा। अहिंबुध्नियं प्रोष्ठपदा ॐ श्चत्वार एकमभि। पूषणं ॐ रेवती पुद्रान्य श्रु नित्यादि सिद्धं। एवमुक्त
विषयेऽनुस्वारस्य ॐ कारत्वे सिद्धे केचिद्दक् होत्रपक्षेऽनुस्वारस्याने क्वचिदनुस्वारः क्वचिद् ॐ का
र इत्यर्द्धं जरती दोषस्तत्परिहारापन क्षत्रसत्रे स्वस्वाध्वर्यवकुशाखीयं याजुषं प्राकृतं हौत्रमिच्छंति॥
परिगृहीतपक्षस्येतरत्र सावकाशत्वात् यथा सोमादौ याजुषहौत्राभावे तत्र ह्रकुति तत्र परित्यागस्त दुद्
त्रापीत्याहुः। मुक्तमिव चैतदाभातीत्यपरे सांप्रदायिकास्तु नेच्छंति तद्युक्तं वा ऽयुक्तं वेति न्यायविद्भिः
साधुभिर्विचारणीयं। यद्यपि ब्राह्मणे अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिंद्रियं इदमासां विचक्षणं १९
हविरासं जुहोतन इत्यादयो मंत्रा वाक्यपुरः पठितास्तथाप्यध्वर्येणैव संप्रयुंजतो ज्ञेयाः। ऋग्वेदे नैव
होत्रमकुर्वतेति श्रुत्या हौत्रं ऋग्वेदविहितमेवेत्युक्तं यजुर्वेद पठितो हौत्र [illegible] मागं ऋग्भाग ऋं ग्भाग
एव। तस्य च यजुर्वेदांतर्गतपाठा ह्वाक्यपुरः पाठे दोषः। वाक्यपुराः पाठस्तु स्वाध्यायाद्योग्यहोनतु श्रौतेक

धा.क्रमांग ८९२

णं र्मणि होत्रमंत्रेषु। अत्र क्रस्वरूपं तन्प्रत्यक्षसिद्धं। कृत्तिकादिष्विष्टिषूपहोमाः श्रुतौ विहितास्तेषां
होमकालविधानमाह। सूत्रं। अथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति। अथशब्दः प्रधान
यागानंतर्ये। पुरस्तात्स्विष्टकृतः स्विष्टकृद्देवतानग्रहणात्पूर्वं। स्रुवग्रहणं स्रुग्व्यावृत्त्यर्थं। आ
हुतीः प्रतीष्टि सोत्र जुहोती त्यधिकृतस्य अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा हेत्याद्याः स्वस्वेष्टिगतविशे
षपरिपठिताः स्रुत्सुक्ता आहुतीरुपजुहोति जुहुयात्। सर्वास्विष्टिषूपहोमसंज्ञकमाहुतिविशेषं हो
मं कुर्यादित्यर्थः। कालमुक्त्वोपहोममाह। सू। अग्नये स्वाहा कृत्तिकाभ्यः स्वाहेति यथासमाम्नातं। श्रु
तौ कृत्तिकेष्टौ तथाहुतिविशेषं होमं कुर्यादिति शेषः। एवं रोहिण्यादिष्वपि ज्ञेयं। ततः स्रुवेण राष्ट्रभृज्ज
याऽभ्यातानहोमान्कुर्यादिति प्रयोगकाराः। तद्विधिं च प्रयोगे वक्ष्यामः। राष्ट्रभृज्जयाऽभ्यातानानामुप
होमसंज्ञकाः। आपस्तंबस्वर्णकेशीगृह्यसूत्रयोर्जयादिहोमे उपजुहोत्युपजुह्वति पुरस्तात्स्विष्टकृत इ
त्यभिधानात्। जयादीनां श्रौतकर्मसु होमस्तु येन कर्मणेत्स्येत्तत्र होतव्या। अत्र श्रौतेष्वेव तेन कर्मणेत्सेति तैत्तिरीय
श्रुतेः प्रायः प्रयोगकारैः संगृहीतोस्ति। स च काम्यत्वादनित्यः। अत्र श्रौतेष्वेव सुक्तेः। सूत्रं। स्विष्टकृतो संप्या

चहोत्रं तदपि सर्वास्वनुसर्तव्यं। पश्चोपहोमादेर्होमकालः सोप्यनुसर्तव्यः। उपहोममंत्रास्तु
२१ श्रुतिपठिताः स्वस्वेष्टिगता एव ज्ञेयाः। एतच्चप्रसादयोहोममंत्रास्तु अन्यत्वांतरीये; सर्वैः स्वस्वा
म्नायपठिता एव स्वानुक्रमेण ज्ञेयाः। व्रतविसर्गोतं समाप्तिरपि कृत्तिकेष्टिवत् ज्ञेया। अनु
क्तशेषमिष्टितंत्रं तु प्राकृतं कृत्तिकेष्ट्यादिषु समानमिति। तदेवं सर्वेष्टिगतं साधारणं तंत्र
मुक्त्वाऽधुनेष्टिविशेषेषु विशेषान्वक्तुं प्रतिजानीते। स विशेषो व्याख्यास्यामः। प्रतिज्ञासूत्रमेतत्।
सः। प्रजापतिः सवितेत्युपांशुयष्टव्या रोहिणी हस्तमूलनक्षत्रेष्टीनां देवतानां अग्न्यादयो ऽन्या
उच्चैरेवेति शेषः। मूलरोहिण्योर्देवतैकत्वादेकत्वं प्रजापतिरिति। यत्तु सज्ञाप्य वर्णं वैकाम्या २१
इष्टयस्ता उपांशु कर्तव्या इति न्यायश्रुतेर्विकृतौ सर्वार्थः शेषः महत्वहिजिसूत्रास्वकाम्यकर्मणां प्र
धानदेवतानामुपांशुत्वं तन्नक्षत्रेष्टिभिन्नकाम्यविषयं। यद्वा द्वैधसूत्रे काम्येष्टीरधिकृत्य उपां
शु श्विजिबोधायन उच्चैरिति शालीकिरित्युक्तं तत्सूत्रादत्र स्वमते सर्वासां प्रासस्योपांशुत्वस्य परिसं
ख्यानार्थं शालीकेर्मते सवितृप्राजापत्ययोरित्युच्चैस्त्वस्य व्यावर्तकार्थं चेदं सूत्रं। पुनर्विधानसाम

र्थ्यात्।वैशेषिकप्रतिज्ञाकृतत्वाच्चविशेषोव्याख्यास्यामइति।इतरथासूत्रारम्भानस्यवैयर्थ्यापत्तेः
।नहिकाचिदाचार्यस्यनिरर्थिकाप्रवृत्तिः।नन्वेवमत्रवक्ष्यमाणराज्यद्रव्यप्रधानकर्मणोःऽर्णमास्य
मावास्येष्टिदेवतयोरप्युच्चैस्त्वंस्यात्।नैवं।नह्याज्येष्ट्योरितरेष्टिवन्न्यायप्राप्तिमेवोपांशुत्वं
येनाऽनेनसूत्रवचनेनतस्यबाधःस्यात्।किंतर्हितत्पोस्तूपांशुयाजविध्यंतेनप्राप्तमेवोपांशु
त्वंनतुतत्केवलंकामफलसंबंधेन।नचविध्यंतप्राप्तमनेनशक्यतेव्यावर्तयितुं।तस्मादाज्ये
ष्ट्योरुपांशुत्वमेव।एवंमघेष्टौबद्धपालदेवतानांपितॄणामुत्तरप्रोष्ठपदेष्टावहेर्बुध्नियस्यचो
पांशुत्वंज्ञेयम्।पद्धस्यवित्प्राजापत्ययोरन्यत्रोपांशुत्वविहितस्याऽत्राऽप्राप्तिःस्यात्तन्माभूदितिप्रा
प्त्यर्थमिदंवचनं।एवंचातिदेशिकंविध्यंतानांसुतरामुपांशुत्वमस्त्येवेति।केचित्तुउपांशुकाम्या
इष्टयःक्रियंत इतिवचनादापस्तंबानामग्न्यादीनांसर्वासामुपांशुत्वं।बौधायनानांतुसूत्रोपात
योर्द्वयोरेवेत्याहुः।एवंचसत्यस्माकंकात्यायनीयानामप्युपांशुकाम्यदेवतेत्युपांशुकांडेकाम्या
नामुपांशुत्वविधानात्सर्वासामप्युपांशुत्वंप्राप्नोत्येव पुरकंतुसूत्रोपात्तस्यवित्प्रजापतिविध्यंतातिदे

पिक भिन्नानामुच्चैस्त्वमेव। अयमेव कर्काचार्यैर्लिखितकारिकासिद्धांतः। याज्ञिकसंप्रदायोप्येवमस्ति
२२ ।उपांशुत्वं च कर्कमते इत्यंऽउपा६। अप्रयोगः श्रुतेरिति शास्त्राद्याजुर्वैदिकमंत्राणां दर्शपूर्णमासा
दिसर्वकर्मस्वुपांशुपाठः समाम्नातः। तत्र यजमानवाचं यच्छ। प्रोक्षणीरासादय। अमुष्मा अनुब्रू
हि। अमुं यजेत्यादिप्रैषमंत्राणां याजुर्वैदिकसंबंधित्वात्तेषामप्युपांशुपाठः प्राप्तस्तस्य नस्तं प्रैषा इ
ति शास्त्रेण कृतो निषेधः। प्रैषमंत्राणामन्यसंबोधनार्थत्वादुपांशुत्वाप्राप्तेः प्रैषैरन्यसंबोधनासि
द्धेरतस्तेषामुच्चैस्त्वमभ्युपगतं। उच्चैर्निगदेनेति श्रुतेः। दर्शपूर्णमासयोः प्रथमस्थानेन प्राकृतिस्वि
ष्टकृतो मध्यमेनेऽउपा; शेषमुत्तमेनेत्युपदिष्टाः स्वरधर्मास्तु दर्शपूर्णमासयोस्तद्विकारेषु प्रैषाणां
पारिभाषिकप्राप्तोच्चस्वरधर्मविधानविधावेव विशेषविधिः; प्रथमादिस्वनधर्मरूपो न तु मंत्रा २२
णामपि स्वनधर्मविधिं तेषां तूपांशुत्वमेव। तेन पारिभाषिकरूपप्रैषगतोच्चस्वरधर्मोग्निहोत्रा
दिकर्मगतप्रैषविषय एव। पुरोडाशावंतरेणाग्नीषोमाउपा६। आज्यस्येत्याज्ययागाभ्यामग्नीषोमी
यस्य प्रैषानुवाचनयोर्यदुपांशुत्वमुपदिष्टं तत्तत्र देवतान्यत्रेति शास्त्राद्देवतापदमात्रस्यैवोपांशुत्वं

वो ध्यं। शेषस्य तु पृथक्स्तवन धर्मः स्तोत्रवाक्यस्य तु मंत्रत्वाभावेपि याजुर्वैदिक संबंधोऽस्त्येवाऽतस्तन्न

संबंधत्वे प्राप्तं पारिभाषिकमुपांशुत्वमस्त्येवाग्निर्हास्तु त्वा गवां कंमं दमाचरंति इति मिश्रा आ

हुः। एवं चोपांशुकाम्य देवताप्रयणे वैश्वदेवग्रहसादयोग्या विहिताउपांशु देवतास्तासां देवता

पदस्य देवतान्यत्रेति शास्त्राद्विहितमुपांशुत्वं प्रागकाल एवानुवाचनस्य जप्रैषगतस्यैव देवपद

स्य न ग्रहणप्रोक्षणनिर्देशप्राणदानादिमंत्रगतस्य प्रकृतिवद्विकृतिरिति न्यायात्। ब्यूहने तं

त्रेणोच्चारणं गुणभेदाभावादिति कर्कलेखनान्देषुः सिद्धांतः। महाध्यानपद्धतौ वाजपेयी नामन्यत्रा

स्येषां ग्रहणप्रोक्षणप्राणदानादिषु मंत्रं तर्गस्य देवतापदस्योपांशुत्वलेखनं न तेषां प्रायोनया

ज्ञिकानुसरणं अनुमतं न तू प्रायापानुगातं अपते मंत्राणामुपांशुत्वेपि केचिद्याज्ञिकाः प्रथमस्तवनेन

मंत्रप्रयोगं कुर्वंति तत्र देवतापदस्योच्चैस्त्वं माभूदित्येतदर्थं। न ह्युपांशावुपांशुत्वं तरधर्मोस्ति। उपां

शुस्वरस्त्वन्यत्र श्रुतः। मद्धाम पथादेवयाज्ञिकमतं तत्पापद्धतिकारेण मतं। एवं च भाष्यपद्धत्योर्वि

रोधे विरोधस्तस्मान्मतभेदश्च। जेनास्माकमपि प्रयोगावसरे देवतावधारणग्रहणप्रोक्षणादिषु देवता

पाद्दस्योपांशुत्वलेखनं पद्धतिकारानुसरणं ज्ञेयं। प्रायः प्रयोगावसरे पद्धतेः प्रमाणत्वात्। एवमेवमु
२३ न्कृते कात्यायनसूत्रानुसारिप्रयोगसारग्रंथे सोमप्रयोगेपि बोध्यं। वस्तुतस्तु विरोधे भाष्यानुसर
णमेव युक्तं। भाष्यकारस्य ज्ञानविशिष्टत्वान्न्यायगुंफितत्वाच्च भाष्यस्य। किंच प्राचीनयाज्ञिक
वल्लभपद्धतौ यथा भाष्यं तथैव प्रयोगो लिखितोस्ति। सांप्रदायिकास्तमेवेच्छिकमिच्छंति। देवयाज्ञि
कमते तु उपांशुप्रयोगः श्रुतेरिती दृश्यते। सत्त्वमिष्टिपशुसोमव्यतिरिक्ताग्निहोत्रादिकर्मविषयं न
तु याजुर्वैदिकसकलमंत्रविषयं। इष्ट्यादिषु याजुर्वैदिकमंत्राणां वक्ष्यमाणविशेषस्वरेण प्रदे
र्शनात्। अग्निहोत्रादिकर्मस्तु प्रैषमंत्राणां प्राप्त उपांशुत्वस्योच्चैस्त्वं न संप्रैषेष्विति शास्त्रात्। दर्श
पूर्णमासयोः प्रथमस्थानेन प्राक्स्विष्टकृतो मध्यमेनेडायाः शेषमुत्तमेनेत्युपदिष्टाः स्वरधर्मा २३
स्तु याजुर्वैदिकमंत्राणां तत्र विहितप्रैषमंत्राणां च भवंति। अग्निहोत्रादिकर्मगतप्रैषमंत्राणां स्व
रधर्मस्तु पारिभाषिकः प्राग्वत्। एतेनेष्टिविकारेषु पशौ स्वरधर्मो व्याख्यातो भवंति। [illegible] सो
मेतूपयमतेभ्योन्येउपांशु· अच्चरंति प्रभाग्नीरखोमीयापाहरणं तेन वा दीक्षणीयान्नीचैस्तरएन्नीचै

स्तरणमित्तरे उपा ८ । अपसदः प्रथमस्थानेन प्राग्देवतादेशात्प्रातःसवने ज्योच्चैः कूर्माणि मध्यमेन
माध्यंदिन उत्तमेन तृतीयसवन इत्यादयो विशेषास्त उपदिष्टास्तत्र तत्र भवंति । ग्रहप्रोक्षणादिषु दे
वताप्रदृष्टोपांशु ग्रहणस्य कुत्रापि देवपहूतौ त्वेवमेव नास्तीति विशेषोऽन्ये समाना इत्युक्तं
प्रासंगिकं । मूलेष्टि श्रुतौ स एतं प्राजापत्यं मूलामेत्यत्र प्रजापतिरिति निर्देशः । याज्यानुवाक्ययो
ति निर्देशो लिंगदर्शनाद्धि केचित् आश्लेषेष्टिमाह ॥ सू० ॥ सर्वेभ्य आश्लेषाभ्य आज्ये करंभमिति स
र्वैयवाभवं त्वधिश्रयणकालेतिरः पवित्रमाज्यमानीय प्रतिरः पवित्रं करंभान्नावपति । करंभोद
धिसक्तव इत्यमरः । इह त्वाज्ये करंभविधानं । इति शब्दः करंभविधिप्रकारे । तेनात्रोपसर्जनी स्था
नापन्नमाज्यं द्रव्यं भवति । ततश्च कर्कमते सघृतं श्रपणं । श्रपणमंत्रे च ब्रह्मन्नप घृतानि प्र
णेष्यामीत्यूहः ॥ पात्रासादने अवुपसर्जनी घृतोपसर्जनी चेति द्वे उपसर्जन्यौ । अधिश्रयणे प्येवं ।
घृतोपसर्जनी प्रतिगृह्य हे मंत्रोहं प्रयोगे लेखिष्यामः । अधिश्रयणकालेतिरः पवित्राधिकरणं बो
धापनविषयम् अत्रैवायं विशेषः । सर्वे यवा भवंति । कृत्तिकेष्ट्यादीष्टिषु व्रीहिमयपुरोडाशपक्ष स्वी

कारेष्वत्र द्वौ संचरदेवौ नक्षत्रदेवश्च सर्वे यवा यवमया भवंति यवद्रव्येऽसौ वयष्टव्या भवंति नतु या
२४ ज्ञिके व्रीहिभिरित्यर्थः। देवासुराः संयत्ता आसन्निति प्रक्रम्यते देवाः सर्वेभ्य आ श्लेषाभ्य आ
ज्ये कर्म भन्निरवपन्निति श्रुतत्वात् ओदनो हि प्रत्यक्षमन्नं तस्माच्चरुर्भवतीति श्रुतिः। ओदनप्र
वश्च व्रीहितंडुलविद्धान्नेरूढः स्तेनानुमत्याश्चरेः पर्याप्तं व्रीहिद्रव्यं सर्वेषां भवंतीति वचने
न परिहीयते। तेनात्र चर्वर्थं यवकुलिकानेवासादयेत् कर्म पुरोडाशयोरर्थे यवपिष्टान्येव। अ
नेनैव विशेषाम्नायज्ञापकेन कृत्तिकेष्ट्यादीष्टिषु पारिभाषिकं यव व्रीहि द्रव्यं च वैकल्पिकं भवत्येवेत्य
वसीयते। तत्रापि चर्वर्थं व्रीहय एव। पुरोडाशार्थं तु यवा वा व्रीहयो वेति विवेकः। यत्र तु नक्षत्रदेवता २४
या औपदेशिकं द्रव्यमाम्नातमस्ति तत्र तस्यास्तदेव द्रव्यं यथा मृगशीर्षेष्टौ श्यामाकं चरुं प्रयसि निर
वपन्नित्यादि। संचरदेवतयोस्त्वौत्सर्गिकमेव। तत्रापि क्वचित् हस्तेष्ट्यादौ नक्षत्रदेवताया गुणवि
शेषविहितानां व्रीहीणामेव संचरदेवताकं चरुमार्याः कुर्वंति। एवं व्रीहिपक्षे संचरपुरोडाशमपि। पुक्तं
तु नक्षत्रदेवताया विहितं चरुपुरोडाशीयं व्रीहिद्रव्ये तरजातीयमेव व्रीहिद्रव्यं सर्वत्र संचरयोर्ग्राह्य

मित्यनवद्यं। यत्तु प्रदीपे सर्वासु नक्षत्रेष्टिषु नक्षत्रदेवताहविषां यद्द्रव्यं तद्देवाग्न्यनुमत्योरन्यत्र
वाप्यव्यपयस आज्यहविषश्चेत्युक्तं तत्स्वोक्तिविरुद्धमतोवश्यं चिंत्यं। स्वोक्तग्रंथविरोधात्। आ
श्लेषेष्टिवत्तथाविधवचनाभावाच्च। यत्तु दैवैर्लिखितं कृत्तिकेष्टि संविधिहविर्व्रीहिमयः पुरोडाश
श्चरुश्चेति तन्नानावीजधर्मपदार्थाकरणसौकर्यायैव ज्ञेयं। कृत्तिकेष्टौ ॥ तादृग्वचनाभावात्
तस्माद्विशेषाऽनुक्तावौत्सर्गिकमेव द्रव्यं सर्वासु भवतीति नि[illegible]रवद्यं। तथाच मत्रोष्टौके एवः। केचि
त्तु संचरद्देवतयोरपि श्यामाकानि छंति। तन्न। आश्लेषेष्ट्यां सर्पेभ्य वा भवंतीति विशेषो यद्देशेनान्य
त्र संचरद्देवतयोरविशेषोवगम्यते किंच अग्नेः श्यामाकीयश्चरुः पुरोडाशो वा। नास्ति कुत्रापि श्या
माकीयपुरोडाशदर्शनात्। नापि अग्नेश्चरुद्रव्यत्वाऽदर्शनात्। अतः सर्वत्र संचरद्देवतयोः कृत्तिका
वद्व्रीहयो यवा वा। नक्षत्रदेवतायास्तु तत्र तत्र श्रुतं नीवारप्रियंगुपय आज्यादि द्रव्यमिति ज्येष्ठं मूलेष्टु
स्तं। स्वशास्त्रीयंकरंभधर्मविशेषं प्रयोगे वदिष्यामः। मघेष्टिमाह। सू॰ पितृभ्यो मघाभ्यः पुरोडाशं ६०श
द्कपालमिति निर्वैत्यपद्धतिकेन निर्वपणप्रोक्षणाभिवपनसंवपनादीनि व्याख्यातानि भवंतीति तातीयसव

न॰ सु॰ सू॰ भा॰ दे॰ निकेन सौम्येन मचरणकस्योव्याख्यातः पितृयज्ञश्चातुर्मास्यांतर्गतसाकमेधाख्ये पर्वण्याम्नातः। तत्र च
२५ पितरो देवताः। मघेष्टावत्रापि पितरो नक्षत्रदेवताः एवं च देवतासामान्याद्रूपसामान्याच्चात्र पैतृय
ज्ञिकस्य द्रव्यपुरोडाशधर्मातिदेशः सिद्धः तत्र च पैतृयज्ञिकेन व्याख्यातं भवतीत्येतावतैवातिदेशे
सिद्धे यत्तु निर्निर्वपणादीनामुपादानं तत्प्रयोजनापैवं न तत्त्वाचार्यश्रौस्याऽनुवादः तत्किमिति चेत्॥
निर्वपणातिदेशेन निर्वापक्रियासाधनभूतं व्रीहिद्रव्यमप्यतिदिश्यते। यदुक्तं पितृयज्ञे। पितृयज्ञंक
रिष्यन्नुपकल्पयत इत्यधिकृत्य व्रीहीञ् श्वःपक्वं श्वैतादिना पात्रासादनेन व्रीहियवासमासादन
थो मुत्क्वाऽग्नेरुत्तरे स्यागार्हपत्यमुपविश्य सोमाय पितृमते जुष्टं निर्वपामीति चतुरो मुष्टीन् व्रीहीणां नि
र्वपति तामेव प्रतिपदं कृत्वा पितृभ्यो बर्हिषद्भ्यो जुष्टं निर्वपामीति चतुर एव पात्राणामेतामेव प्रतिपदं कृ
त्वा पितृभ्योऽग्निष्वात्तेभ्यो जुष्टं निर्वपामीति चतुर एव पवानामिति। अनेन पितृयज्ञेषु द्रव्यपालस्योत्तर्गि २५
कं यवद्रव्यं व्यावर्त्यते व्रीहीणामेव निर्वापश्रवणात्। तेन प्रकृतिवद्विकृतिः कर्तव्येति न्यायेनात्र मघे
ष्टावपि नक्षत्रदेवतापुरोडाशे व्रीहिमय एव भवति न तु यवमयः मोक्षणाधिवपनसंवपनानि

तुमहकृतिवत्संचरह विमृष्टितंत्रताविधानापत्ति। पितृयज्ञेतु पृथगेव प्रोक्षणानि। भिन्नद्रव्यत्वादि
तराभ्यां। तेनात्र संचरदेवताक आग्नेय पुरोडाशोपिव्रीहिमय एव भवति। प्रोक्षणादिषु तंत्रे
णसंस्कारणतिदेशात्। ननु संचरदेवताकश्चरुरेव व्रीहिद्रव्यं। ओदनो हिमत्स्यक्षमन्नं तस्माच्चरु
र्भवतीति श्रुत्वा व्रीहितंडुलैरेवौदनत्वसिद्धेः। संचरपुरोडाशस्य त्वौत्सर्गिकं व्रीहियवान्यतरद्रव्य
मस्ति तत्केन शक्यते निवारयितुं। तेन चरुणैव प्रोक्षणादिषु तंत्रतान संचरपुरोडाशेनेति चेत्सत्य
ति म्। तथापि सा न संभवति तंत्रताऽधिवपने। अधिवपनं तु पेषणार्थमेव। न हि चरोः पेषणमस्ति। अत एव प्रो
क्षणोपलक्षणे नैवार्थसिद्धेर्यदधिवपनोपादानं तत्संचरपुरोडाशेनैव सहतंत्रप्रापणार्थं। न हि चरौर
धिवपनं स्यात्। तस्मात्संचरपुरोडाशे व्रीहिमय एव। संवपनं तु पुरोडाशेऽनूघचरुणा सहतन्माभूदि
सेतर्थं। एवमतऊर्ध्वं तंत्रताऽभावसूचनाय्यादिपदं ज्ञेयं। ततश्च कृत्तिकेष्ट्यादीष्टिषु यवमयपुरोडाश
पक्षे स्वीकृतेप्यत्रमचेष्टौ त्रीणि हवींषि व्रीहिमयान्येव भवंति। प्रोक्षणादयः संस्काराः यथाप्रयोगं तंत्रेण
कर्तव्या इति साधु ज्ञेयं। अपरव्याख्याकारात्साय्यनानुगताश्चेत्पत्रिकेन निर्वपणादि व्याख्यातं भवती

न·स·सू·भा·दे· त्येतावृत्तैवोक्तेनिर्वपणादिपदोपलक्षिताः संचरहविर्भ्यामिष्टधर्मभूता असाधारणा हविःसंस्काराः पित
२६ धर्मेणपैतृयज्ञिकषट्कपालश्चैन्द्राग्नादिष्टिकाभवंत्स्येवप्रोक्षणस्योमप्युनः प्रोक्षणोपादानंत
न्निर्वपणप्रोक्षणवेवाऽसाधारणरूपो स्वधर्मेण प्राग्विभज्या लंभाभ्दवत इत्येतदर्थं।यतः साध
रणवधिसंवपनावप्यतिदिष्टौ।अधिवपनं पेषणार्थं दृषदि तंडुलावापः।संवपनं संयवनार्थं तु पवि
त्रपात्र्यां पिष्टावापः।तत्राप्यधिवपनातिदेशोपदेशेनोपलक्षितेनैवेतरसाधारणपदार्थातिदेशो सिद्धस्य
तु पुनः संयवनात्मा क्रियमाणस्य संवपनस्यातिदेशः स संचरहविर्भ्यां दैवपित्र्यसाधारणकर्मत्वा
द्वैविकाऽग्नेरष्टाकपालस्य प्रथमोपस्थितत्वाद्धि प्रतिशिष्टसमवायेऽभ्यासांस्यात्तद्धर्मत्वमितिन्यायात् २६
त्स्विष्टकृपालस्य निर्वपणप्रोक्षणेतरसंस्काराणामपावत्संयवनांतं दैवधर्मेण संचरहविर्भ्यां साधारणध
र्मप्राप्त्यर्थं अनेनैव ज्ञापकेन कृतिकेष्टिप्रभृतिष्वमपुरोडाशपक्षाभ्युपगमेपि सत्तिमच्चेष्टौ ब्रीहिमया
वेव पुरोडाशौ भवत इति गम्यते।निर्वपणप्रोक्षणादिना त्रयाणां साधारण्येन निर्वपणप्रोक्षणेतरसंस्का
णातिदेशात्।किंच।अंगीकृतस्यप्राग्भिस्त्रयाणां दैवधर्मेण साधारण्येन संस्कारातिदेशः केशवादिभिस्त

धाप्रयोगनिबंधनात् तथा चाह भारद्वाजसोमयाजी केशवः। अग्नेयस्य मुख्यत्वात्तद्धर्मं यज्ञोपवी
तित्वमाश्रित्यैव सर्वसंस्कारजातं कर्तव्यं न च संदेहः षट्कपालः प्रधानभूतोऽप्रधानमिति। अतिशयेनप्र
धानत्वे कः संदेहः तर्हि संचरुरूपोऽपि प्रधानत्वं स्यात् तथा च तयोर्द्वयोरेकस्य वा प्रमादाल्लोपे पुनः
करणं प्रसज्येत। अंगिलोपे पुनः क्रियेतेति वचनात् सत्यं तयोरप्यंगित्वमेव। किंतु नक्षत्रदेवतायाश्र
भितः कर्तव्यतामात्रे विशेषः। प्रधानयाज्यानुवाक्याकाले अग्निर्मूर्द्धा भुवः। अनुनोद्यानुमतिरन्विदनु
मते त्वमिति तयोर्याज्यानुवाक्यापाठात्। प्रधानत्वमतो युक्तमेव। यज्ञोपवीतता सर्वसंस्कारेषु। षट्कपालप्र
चरणे प्राचीनावीतं। यज्ञोपवीतविस्रंसनं च पित्र्यप्रज्ञातिदेशेन। कपर्दिनापि भावत्वप्रधानमेव प्राची
नावीतमुक्तमिति। अत्र सर्वसंस्कारेषु यज्ञोपवीततामचरणकाल एव प्राचीनावीतित्वं च स्वरूपेण स्त्रीयपि
त्र्ययज्ञातिदेशेनैव। आपस्तंबीयानां पितृयज्ञे तथैव समाम्नानात्। अस्माकं तु पितृयज्ञस्य पिंडपितृयज्ञ
वत्स्यैतत्ककर्मत्वात्तत्र च विपर्यस्यापित्र्येषु तु सकृद्दक्षिणा चेति पारिभाषिकाः सर्वे धर्मा भवंति विशेषाम्ना
नाभावात् तेन षट्कपालसंबंधस्याधारणः संस्कारा निर्वापप्रोक्षणादयः प्राचीनावीतिनैव। बौधाय

नानामप्येवं। तथा च माध्यश्रुतप्रदीपे निर्वापादिषु प्राचीनावीतित्वं पित्र्येषु। अग्न्यनुमन्त्रणोपर्यज्ञोपवीतित्व
२७ मिति। तथाऽवंतदेव प्रयोगे च द्रूकालसाभिमर्शनं कपालेष्वधिश्रपणं प्रथनं श्लक्ष्णीकरणं द
र्भैरभिज्वलनं भस्मानाभिवासनं पात्र्यासादनं प्रयाजशेषेणाभिघारणमित्याद्यसाधारण
पदार्थान्प्राचीनावीती कुर्यात्। इतरहविषोस्तु यज्ञोपवीत्येवेति। एवं चासाधारणसंस्कारेणां
प्राचीनावीतित्वविधानादेवेतरसंस्कारेष्वितरपसाधारणेः कंडनपेषणादृष्टो यज्ञोपवीतिने वे
त्यर्थादेव सिद्धमिति साधूक्तं। पितृयज्ञे बौधायनसूत्रे तु निर्वापे अथ यज्ञोपवीतं कृत्वेति समाम्नातम
स्ति। तत्प्रयोगकारैरुपेक्षितं तत्र प्रमाणं मृग्यमित्युक्तं प्रासंगिकं। प्रकृतमनुसरामः। ओदनो हि
प्रत्यक्षमन्नं तस्माच्चरुर्भवतीति श्रुतेस्तंडुलैरेवौदनत्वसिद्धेश्चर्वर्थे तंडुला एवापेक्षितास्ते च व्री
हिभ्य एव निष्पद्यंते न तु यवैः। न च वारुणे यवमयश्चरुरन्यत्रापीतिवदनुमत्याश्चरोर्यवमयत्वं कुत २१
श्चिदतिदिष्टं स्येनेतरदेवतयोः पुरोडाशे यवमयत्वं स्यात्। असाधारणेन धर्मातिदेशभयात्। न च स
र्वे यवाभवंतीत्याश्रयेष्टिवद्विशेषाम्नातमिहास्ति। तस्माद्बहुस्वरनुरोधादुज्जन्यापाद्यचरुर्व्रीहिमया

एवं भवंतीति साधु स्यं। यत्तु केशवेनस्सर्वेषामेव भवंतीति लिखितं तत्र मूलं मृग्यं। तेनाप्युत्सर्गः सं
चरयोरपि वैकल्पिके यव व्रीहि द्रव्ये एवेत्युक्तं। तत्रापि चरोर्व्रीहिद्रव्यमेवास्ति। यच्च प्राणाश्लेषे
ष्टोस्सर्वेषामेव भवंतीति प्रणीतं सूत्रं मंडूकप्लुतिन्यायेनात्रमपेक्षाव्याकृष्य सर्वेषामेव मयत्वे
मुक्तं कल्प्यं॥ तद्युक्तं वा युक्तं वेति सुधीभिर्विचारणीयमेव। एवमादिपदोपलक्षितेनविधस्यालंभो
तरमस्ताधारणरूपेणैतत्क धर्मेण द्रव्यसंस्कारः। षट्कपालस्य भवंति इतरहविषोस्तु सर्वेषा
धाप्रकृतिपक्षोपवीतिनेवेतिवेदितव्यमिति। एवमेवाऽ■ति देशिकः प्रचारोपि षट्कपालस्य परिश्रि
तेग्नोपैतत्पश्चिकषट्कपालधर्मेणसिद्धस्तत्र ति ज्योऽस्थोमेतात्तीयसवनिकसौम्यचरोः प्रचारधर्मातिदेश
ग्रहणमत्राग्नो दक्षिणपूर्वार्द्धदेशे होमविधानार्थं पूर्वार्द्धेऽपरार्द्धदेशेऽभ्यवदानग्रहणार्थं चापि त
यज्ञैऽग्नौ होमदेशविधानाभावात्पूर्वार्द्धात्सकृदवदानग्रहणाच्च। आश्रावणादौ पक्षे स्वधाणव्दस्या
हत्यर्थं च तथा च सौम्यप्रचारेणोधापनः। अथोपस्तीर्य द्विश्च ऐरवद्यति पूर्वार्द्धात् द्विरवदाय परार्द्धाद्व
द्यत्यभिघारयति प्रत्यनक्त्यनाक्रम्याश्राव्याह सौम्यस्य यजेति वषट्कृते दक्षिणार्धपूर्वार्द्धे प्राचीना

वीतीसौम्यंजुहोतीति।अत्राऽत्याक्रमणंत्वातिदेशिपैतृयज्ञिकंविपर्यस्तमुदङ्ङुःवाभ्युपगंतव्यं॥
२८ ६८ पितृप्रधानत्वात्तत्र च दक्षिणामुखेन होमविधानाच्च। शेषोनुवाद एव तेनाऽथौदाहवनीयपूर्वे
णप्रदक्षिणं परीत्य दक्षिणतोऽवदायोदङ्ङुःति क्रम्य दक्षिणामुखस्तिष्ठन्नध्वर्युर्जुहोतीतिसि
द्धं तथाचाहापस्तंबः सौम्यप्रचारे। प्राचीनावीती सौम्येन प्रचरतिहस्तेन प्रथममवदानमवद्य
तिमेक्षणेनोत्तरमेतद्धाविपरीतं दक्षिणतोवदायाभिघार्योदङ्ङुःति क्रम्य दक्षिणामुखस्तिष्ठन्ना
श्राव्यप्रत्याश्रावितेसंप्रेष्यतिसौम्यस्ययजेतिवषट्कृते दक्षिणार्धे जुहोतीति अत्रोभयत्रात्राभ्यां
दक्षिणपूर्वार्द्धेहोमाश्रावणप्रत्याश्रावणानिचेतित्रयंकात्यायनीयानां संग्राह्यं भवतिन तूद
ङ्ङुःत्याक्रमणादीतरत्। स्वर्णास्ते पितृयज्ञएवातिक्रमणनिषेधात्। नातिक्रामतीति श्रुतेः॥ अ
नतिक्रमणंचेतिसूत्रितत्वाच्च। उदङ्ङुःत्याक्रमणंतु प्राकृतमेवातिक्रमणंव्यस्तं दक्षिणामु २८
खतासिद्ध्यैपितृकर्मत्वात्। सातुपारिभाषिकी श्रुतिसूत्राभ्यामनतिक्रमणस्य प्रतिषेधमुखेनैवसू
चितामवत्यतउदङ्ङुःत्याक्रमणंनभवति किंतु मध्याद्दक्षिणतश्चावदत्स्वपितृयज्ञेदक्षिणाग्नेरुत्त

रत इवाहवनीयस्योत्तरतो जुहोति। स्थानान्तिकं चित्तुनः स्थितो दक्षिणामुखोऽध्वर्युस्तिष्ठंश्च जुहो
तीति ध्येयं। उभयसूत्रगतमितरत्सर्वं तु यथास्वसूत्रं बोधायनापस्तंबयोरेव स्तुमदीपे अन
न्यकर्म्यैवेति लिखितं तत्सौम्यातिदेशिकस्वसूत्रविरुद्धमिति चिंत्यं आग्नीध्रोपिषद्कपालयागे
यथाप्रकृति दक्षिणामुख एवाऽध्वर्युः सव्यपार्श्वस्थितः प्रत्याश्रावयति। पितृकर्मत्वेन प्राप्तस्य
दक्षिणामुखत्वस्य स्वतः सिद्धस्य च वचनमंतरेण प्राकृतदिक्स्थानविपर्यासं कर्तुमशक्यत्वा
त्। यत्त्वेकस्मु अध्वर्योरनभिमुखता। सा येत दक्षिणामुखविशेषेण परिहृीयते। सन्निहितस्थितेना
पि प्रत्याश्रावणे मुखमात्रविपर्यासेनाभिमुखं कर्तुं संभवाच्चेत्यदोषः षट्कपालश्चित्तुपधानप्रकारं
तु पित्र्ये श्वित्र्यतयोगे लेखिष्यामः। अत्र कात्यायनीयानां पितृयज्ञस्य चरणशब्देन सर्वोपांशुत्व
विधानात् तदंतर्गतषट्कपालादि देशिकं षट्कपालपुरोडाशीयमनक्षत्रदेवतापाविधि ध्यं तत्रापि समुपां
शुत्वं भवत्येव। प्रजापतिः सवितेत्युपाठ। श्विति सूत्रादितरेषां मुख्यैः स्त्वं तु प्राप्तान्तिदेशिकभिन्नविषय
मिति व्याख्यातं। सर्वेषांशाखान्तरीयाणां स्वस्वशाखीयपैतृयज्ञिकषट्कपालादि देशगहितिन्या

पविद्ः। तथा षद्कपालयागसंबंधेन मास्यमातिदेशिकं परिच्छतकरणं त्वाग्नेयेन संचरपुरोडाशे
२९ नप्रचर्यकुर्यान्नत्वास्यां ते। बौधायनसूत्रे प्रयाजैरिष्ट्वाऽऽज्यभागाभ्यां चरित्वाऽथैनं परिश्रयं
ति तस्योदीचीं द्वारं कुर्वंतीति षद्कपालयागात्पूर्वं प्रधानयागकाल एव समाम्नातत्वात् षद्कपाल
मात्रस्यैवाऽत्र परिवृतसंबंधाच्चानेतरयोः तस्मात्तात्कालिकमेव परिवृतं कृत्वा षद्कपालेनप्र
चर्याऽनंतरं परिवृतस्यैपारोक्करणं ततोऽनुमतियागादि तच्चापसव्येनर्त्विग्यजमानाहवनीया
ग्निभिः साई वेदेः समंततो वस्त्रकटादिनाऽर्धपरिमाणमपरद्विग्द्वारं चतुरस्रं तत्पक्षे उपरिष्टाद्वि
तानाद्याच्छादनसर्ज्जं च कुर्यात्। आतिदेशिकमुदग्द्वारं तु बहिर्निष्क्रमणाऽभावादुपेक्षितं। मस्य
ग्द्वारं तु गार्हपत्यस्य पुरस्तादंतर्धानपरिहारएव भवत्येव। पितृयज्ञेतु दक्षद्वारस्योभयार्थतादर्श २९
नात्पत्नीयेपत्नीसंयाजएवनर्यशं स्यायोरं तद्वीनविधानाच्च। शेषं मूले स्पष्टं। पैतृयज्ञिकातिदेशिका
न्याज्यालंभजपादिषु मंत्रोहांस्तु प्रयोगे विविच्य लेखिष्यामः। षद्कपालपुरोडाशास्तु बहुदेवता
कः। पितृभ्यो मघाभ्य इति चतुर्थ्या बहुवचनश्रवणात्। अतश्चतुर्द्धाकरणं न भवति। पितरो वाभका

मयंते॰ तदधिकृत्यतत एनं पितरः सोमपाभ्यः पुरोडाशः॰ यद्यूपालम्नि रवपन्निति श्रुतत्वात्। स्वा
तीष्टिमाह। सू॰। अथैतदाग्नवेनिष्ट्यायै गर्ष्ये दुग्धमिति। अतऊर्ध्वंमूलेऽपशब्दः उक्तोऽनंतर्यं। ए
तच्छब्दः श्रुत्यनुकरणार्थः। वायवे वा सुदेवतायै। कथंभूतायै निष्ट्यायै निष्ट्या गुणविशिष्टायै।
निष्ट्याशब्दः स्वातीनक्षत्रपर्यायः। रमाशब्दः वहूपंचतुर्थ्या निष्ट्या या इति। गर्ष्याद्दुग्धं गर्ष्ये
दुग्धं षष्ठ्यर्थे चतुर्थी। नवोढा सहकृतासूता॰ स्यवपत्यायोगर्ष्टिरित्यभिधीयते। गर्ष्येदुग्धमि
त्येकत्वनिर्देशादेकस्या एव गोर्दोहोऽत्र नतु दर्शवत्सर्वासां। इतिशब्दो दोहप्रकारः। वायवे निष्ट्यायै ए
कस्या एव गर्ष्या गोर्दुग्धं पयो गार्ष्यं भवतीत्यर्थः। वा पुर्वा अकामयतेत्यधिकृत्य स एतद्वायवे निष्ट्या
यै गर्ष्ये दुग्धं पयो निरवपदिति श्रुतत्वात्। अथैदं चिंत्यते। गर्ष्ये दुग्धं पयो निरवपदिति श्रुत्या
निर्वापः समाम्नातः। स च चतुर्मुष्टिक एव। न हि पयसः संभवति सः। किं तर्हि। निर्वापशब्देन गोर्दोह
३० धर्मेणैहो अभिधीयते। तत्र च वायोर्गर्ष्याद्दुग्धस्याधिश्रयणादयः संस्कारा भवंत्युत नेति। नेति ब्रू
मः। तत्कुतः। अन्यत्र दर्शनात्। तथा च चातुर्मास्यांतर्गते चरमपर्वणि शुनासीरीये कात्यायनसूत्रे। वा

यद्वं पयो लौकिकं प्रतिधुक् श्रुतेर्नाविरोधात्प्रकृति दर्शनाद्भवेति। प्रतिधुक्धारोष्णमुच्यते। उपदे
३० शेनातिदेशेन वा धर्मप्रसवः अत्र द्रव्यदेवतासामान्यातिदेशाद्धारोष्णमेव दुग्धं पागार्हं भव
ति न त्वधिश्रयणाद्यः संस्कार इति प्राप्ते आह सः पयसः प्रातर्दोहवत्संस्कारः। यद्दुग्धं पय
सोऽधिश्रयणाद्यः संस्कारः न भवंतीतं न्वेति। किं तर्हि। भवंत्येवाऽधिश्रयणाद्यः संस्कारः
॥ कथं तर्हि प्रातर्दोहवत्॥ यथा दर्शेष्टेः प्रातर्दोहस्तद्वत् वतिनाकालोप्यतिदिश्यते नतु प्रतिधु
क् पयसो पागकालः संस्कार इति लिंगमविवक्षितं। तेनाग्न्यन्वाधानानंतरं शाखाछेदनानु
मार्जनशाखापरिवासनोपवेषकरणपवित्रबंधनस्य पवित्रशाखयैवैकस्या एव प्रथमप्रसूता
पागव्याघ्रोर्वत्सापाकरणवापवेनिधापै मागमितिगोःस्पर्शनयजमानस्य पश्वर्यूहीत्युप
गूहनानि आज्यनिर्वपणं तएवकाले उपस्थाप्रश्नोत्तरे॥ ततउखादानाधिश्रयणादिपरिप्ला ३०
लनांतं। सं च रणुक्रमेण प्राण दानादीति बौधायनमतेन तु स्त्रद्धयस्येकमेव तंत्रं निगद्व्या
ख्यातं। कृत्तिकादिनक्षत्रेष्टीनां तत्तन्नक्षत्रेषु पागकालोऽभिहितः। इष्टानी श्रुतिक्रमप्रासामानक्ष

त्रेष्टिभिन्नायां दृष्टेः कालविधानायेदमाह। सू॰। आ विशाखाभ्यामिष्ट्वा। इंद्राग्निभ्यामेकादश
कपालेन पुरोडाशेनेनिस्तत्र शेषः आङ्‌अभिविधौ। इंद्राग्नी वा अकामयेतामित्यधिकृत्य तावेत
मिंद्रा[illegible]ग्निभ्यां विशाखाभ्यां पुरोडाशमेकादशकपालं निरवपतामिति श्रवणात्। इति केष्टि
मारभ्य यावद्विशाखेष्टिं चतुर्दश नक्षत्रेष्टीः कृत्वा ततः किं कर्त्तव्यमित्याह। सू॰। तदनीमेव पौ
र्णमासीमाज्येन यजेत। तदानीं तस्मिन्नेव विशाखानक्षत्रेष्टिदिन एव पौर्णमासीं पौर्णमासीदे
वतामाज्येनाज्यद्रव्यप्रधानेन संचरहविर्भ्यां साईं यजेत यागं कुर्यात्। नक्षत्रसत्रांतर्गतश्रु
तिपठितां पौर्णमासेष्ट्या व्यामपूर्वामिष्टिं कुर्यान्न तु प्राकृतेमिष्टिं। एवकारकरणाद्विशाखे
ष्टिं तर्पणांतां समाप्यानंतरमुत्तरक्षणएवेत्यर्थः आहवनीये होमा इत्याहुतीनामधिकरणमा
हवनीयः यजेतेत्यनेन यागो यजतिरुक्तः। तस्याश्च ध्रुवायाएव द्रव्याभिनिर्वृत्तिः। तेनाग्नेये
न संचर आहवनीये यजतयो ध्रुवायाइति परिभाषणात् पुरोडाशेन प्रचर्य ध्रुवामाप्याय्याप्या
प्य तस्याश्चतुरवत्तं पंचावत्तीनां पंचावत्तं वा कृत्वा पौर्णमासीदेवतायागः। ततोऽनुमतियागः। इ

तरत्साधारणं। उपांशुयाजविध्यंतेनोपांशुत्वं चेतीष्टिस्वरूपं। अथैनत्सौर्यमासस्याज्यंनिर्वपतीत्या
३१ दिश्रुतत्वात्। अनूराधेष्टिमाह॥ सू॰॥ अथ श्वोभूते मित्रायानूराधेभ्यश्चरुमिति। श्वोभूते यागकाला
नुराधेनौराधानक्षत्रदिनएव। श्वः शब्दस्यनक्षत्रदिनपरत्वादित्युक्तंप्राक्। मित्रोवाअकामयतेसधि
कृत्यस्यएतंमित्रायानूराधेभ्यश्चरुन्निरवपदिति श्रुतत्वात्। एवं यागकालोचितेषुकृत्तिकादिनक्षत्र
दिनेषु तत्तन्नक्षत्रेष्टयउक्ताः इदानीं श्रुतिक्रममाश्रित्याऽभिजिन्नक्षत्रेष्टिस्तस्याः कालविधानायाह
॥सू॰॥ उत्तराषाढाभिरिष्ट्वा। मंडूकप्लुतिन्यायेन विशाखेष्वित्युक्तमाङ्‌त्राऽभिविधावनुषज्यते। तेनआ
ङुत्तराषाढाभिरुत्तराषाढांताभिरिष्टिभिरिष्ट्वेत्यर्थः। विश्वेवैदेवाअकामयंतेत्यधिकृत्यस्तएतंविश्वे
भ्योदेवेभ्योषाढाभ्यश्चरुन्निरवपन्निति श्रवणात्। अनूराधेष्वनंतरं श्रवणेष्टेः प्रागुत्तराषाढां ३१
ताश्चतस्रो नक्षत्रेष्टीः कृत्वाततः किंकर्तव्यमित्याह। सू॰ तदानीमेवाऽभिजिता यजेत। तदानींतस्मिन्ने
वोत्तराषाढानक्षत्रेष्टिदिनएव। अभिजिता अभिजिन्नामनक्षत्रेष्ट्या। एवकारकरणादुत्तराषाढेष्टिं
समाप्यतदुत्तरक्षण एवाभिजिन्नक्षत्रेष्ट्या यजेतचरुणायागंकुर्यादित्यर्थः। अभिजिन्नक्षत्रकाल

स्वरूपविधायिकातैत्तिरीयश्रुतिः । अभिजिन्नाम नक्षत्रं । उपरिष्टादषाढानां । अवस्ताछ्रोणायाइति ॥
अषाढानां उपरिष्टाद्दुपरितनोंऽतिमस्तुरीयः पादः श्रोणाया अवस्ताघ्र्वणस्या धस्तन आद्यः प्रथमः
पादः । एवं स्थूलदशघटिकात्मकोऽभिजिन्नक्षत्रकाल इति श्रुत्यर्थः । तथा च विद्यारण्यस्वामि
नः । उत्तराषाढानक्षत्रस्य चतुर्थः पादः श्रवणनक्षत्रस्य चाद्यः प्रथमः पादः तदुभयं मिलित्वा नक्ष ३५
त्रसंबंधिरूपं अभिजिदाख्यं किंचिन्नक्षत्रमिति चिंतामणौ तु वैश्वप्रांत्यांघ्रिः श्रुतितिथिभागतोऽ
भिजित्स्यादित्युक्तं । अस्यार्थः । वैश्वमांत्यांघ्रिः । विश्वेदेवा देवता यस्य तद्वैश्वदैवं । विश्वेदेवा देवता
कमुत्तराषाढानक्षत्रं तस्य । मांत्यांघ्रिः । मउपसर्गो । अंत्योंऽतिमः । अंघ्रिः स्थूलदशपंचदशघटिका
कश्चतुर्थः पादस्तदारभ्य । तथा श्रुतितिथिभागतः श्रुतिः श्रवणनक्षत्रं । तस्य तिथिभागतः तिथिः पं
चदशपर्यायः । श्रवणनक्षत्रस्य च पंचदशोंऽशतः स्थूलदशघटिकाचतुष्टयात्मको यावदाद्यो भागः
अयमर्थः । पूर्वोत्तरदिवसाभ्यां यावद्द्वीपलात्मक उत्तराषाढानक्षत्रभोगस्तत्तुरीयांशोंऽतिमो भा
गो यावद्दैवं श्रवणभोगस्तस्य च दशांशो यावदाद्यो भाग उत्तराषाढानक्षत्रस्य तृतीयभागानंतरं

श्र॥ वणस्य पादस्य चतस्रो घटिकाः एवं स्थूलदृशा एकोनविंशतिघटिकात्मकोऽयः कालः सोऽभिजिदभि
३२ जिन्नामनक्षत्रं स्यात्। भवेत्। अभिजिन्नक्षत्रकालस्वरूपं भवतीत्यर्थः। एतावत्सरिछिन्ने श्रुतिस्मृ
त्युदिते द्विविधे काले अभिजिन्नक्षत्रेष्टिं कुर्यात्। तदानीमेवेत्यनेनैव ब्राह्मणकेन पश्चिमाहन्युत्तर
नक्षत्रेण पूर्वनक्षत्रसंधिस्तस्मिन्संधिमत्येव नक्षत्रे हनि पूर्वनक्षत्रेष्टिं कुर्यादिति निर्णीतं प्रा
ग्भिः। अतो दिवा वा रात्रौ वा यदाऽभिजिन्नक्षत्रकालस्तदैवाऽहोरात्रेष्व्याप्ता वाऽभिजिन्न
क्षत्रेष्टिं कुर्यात्। एवकारेण क्लिष्टस्तु संभवे स्यादिति ज्ञेया। अस्या इष्टेर्द्रव्यदेवते तु श्रुत्यानुक्तेऽ्व। कालवि
धानार्थं तत्र सूत्रं। ब्रह्मवा अकामयतेत्यधिकृत्य तदेतं ब्रह्मणेऽभिजिते च रुचिं निरवपदित्यादिश्रु
तत्वात्। श्रवणे त्रिमाह। सू०। अथ यद्यो भूते विष्णवे श्रोणाय पुरोडाशं त्रिकपालमिति। निगदव्या ३२
ख्यातं। यत्तु मूले श्रोणायै पुरोडाशं त्रिकपालमित्यादिसूत्रपाठः सोऽसंगतिकोऽपपाठः श्रु
तिविरुद्धत्वात्। अविछिन्नपरंपरातो याज्ञिकानां वैदिकानां चाध्ययनप्रचारभावात्। वैष्णवस्त्रि
कपाल इत्येवाऽन्यत्र एवजरूपादौ दर्शनाच्च। तथा श्रुतिः विष्णुर्वा अकामयत श्रोणां स्वधिकृत्य स एतं

विष्णवे श्रोणायै पुरोडाशं त्रिकपालं निर्वपदिति त्रिकपालोपधानमकारस्तु पुरोडाशस्य शु
प्रमितं हतं कपालचितिक्षेत्रं साधयित्वा समंत्रे विधामज्यत्र यागस्याधाना मेव कपालानामु
पधानं। अन्यत्र हतं बहुवचनांतेनेति। उत्तरस्मोष्ठपदेष्विमाह। सू०। उत्तरेषु प्रोष्ठपदेषु पुरोडाशं
६ भूमिकपालमिमि। प्रोष्ठशब्दो भाद्रपर्याये। पूर्वोक्तरैंमोष्ठपदनक्षत्रे। तत्र पूर्वेषु श्रुतौ चरुर्द्रव्य
स विहितत्वादत उत्तर इत्युच्यते। द्रव्यदेवते तु श्रुतौ विहिते एव। कपालगतधर्मविशेषार्थमिदमु
क्तं। अहिर्बुध्नियो कामयतेति प्रक्रम्य स एतमहये बुध्नियाय प्रोष्ठपदेभ्यः पुरोडाशं भूमिक
पालं निरवपदिति श्रुतत्वात्। कथं च कीदृशं तद्भूमिकपालमिति स्वयमेव व्याचष्टे। सू०। कपाल
मात्रं भूमौ परिलिख्यांगारमधिवर्तयति तत्सैक कपालवत्संस्कारः। गार्हपत्यभस्मापोह्य क
पालमात्रं भूमौ गार्हपत्यखरे भूमौ कपालक्षेत्रमात्रं कर्कटेन सूत्रेण वा कपालं परिलिख्य आले
खनेन हतं कृत्वा प्रथमकपालमंत्रेणोपदध्यात्। ततः सर्व्वांगुल्या भूम्येंगारमधिवर्त्तयति कपा
लोपर्यग्ने ब्रह्मेति मंत्रेणानिदध्याति। अधीत्युपरिभावमितियाज्ञिकः। अध्यंगारनिधानविधानाद

भोंगाराहरणमर्थादेवनभवति। तदवच्छादन विरोधात् केचित्तद्धो विरोधादपि धर्ममात्रत्वादुपरिनिधा
३३ नमाहुः। अन्येत्वंगारमाहृत्यततः परिलिखेदित्याहुः। उपधानं तु हस्तस्पर्शनेनैव कर्त्तव्यं एवमुद्ध
सनमपि लेखोन्मार्जनेनैव। तस्य भूमिकपालस्य संस्कार अंगारैरभ्यूहनसंस्कार एककपाल
वत् तप्यस्वेत्येकवचनांतेनेत्यर्थः। व्याख्यांतरं। संस्कार इत्येकवचनमविव क्षितं सर्वेषामेकक
पालानां द्यावापृथिवीय एककपालः प्रकृतिः। तेन तस्य भूमिकपालपुरोडाशस्य एककपालवत् द्या
वापृथिवीयैककपालपुरोडाशवत् संस्कारः प्रधानोपकारकाः सर्वे धर्मास्तदंगतां भवंति। एककपाला
नां प्रकृतिस्तु चातुर्मास्ये वैश्वदेवपर्वण्युक्ता द्यावापृथिवीय एककपाल इत्यादिना। तत्रचाहतवासः
परिधानं त्रेधा बर्हिर्नवप्रयाजानुयाजाश्च विहिताः संति ते च सर्वेऽपि विकृतिनाऽतिदिश्यंते। एवं प्रकृ
ति वद्विकृतिर्भवति। तदेतदपरे न क्षमंते। इतरयोः संचरदेवतयोः प्राकृतं बर्हिः पंचप्रयाजादि धर्मवि
रोधात्। तिसृणां सम प्राधान्यादि [illegible]पत्त्व हतवासः परिधानं तदपि द्यावापृथिवीयैककपालसंस्तवं श्रेव
न+ स्युक्तं। भूपसांस्यात्तधर्मत्व मिति न्यायविरोधात्। एककपालवदित्येव सत्र कृदुक्तो भ्यंनतु द्यावापृथिवीये

त्वेककपालमात्रस्य। तस्मात्संस्कार इत्येकत्वविवक्षणमेवयुक्तं। अतश्च संचरविरोधिनो ध
र्मा भवंति। केचामी। कपालोपधानेभ्यूहनमेककपालधर्मेण। प्राणदानानंतरमाज्येनांताघणदनं
अपर्याव तस्य सकलस्य पाणिनैव होमः। इति नैककपालाति देशिकमुपांशुत्वं चेति। नक्षत्रेष्टिभि
न्नाऽज्येष्टिकालविधानमाह। सू। आयभरणीभिरिष्ट्वा तदानीमेकाऽमावास्यामाज्येन यजेत। अप
भरणीभिरिति छेदः। आङ् अभिविधौ। शेषं पौर्णमास्याज्येष्टिवन्निगदव्याख्यातं। यमो वा अकामय
तेति भरणीष्टिमपि कृत्वा स एतं यमायापभरणीभ्यश्चरुं निरवपदित्यादि अभिधाय अथैतदमा
वास्याआज्यं निर्वपतीत्यथशब्दश्चानंतर्येण पौर्णमासीष्टिवदत्रापिश्रुतत्वादुभयत्र तदानीमेवेत्युक्तं
तदेव मंतव्यं। तेचाज्येष्टिद्वयसहितानां कृत्तिकादिभरणीपर्यंतानामष्टाविंशतिनक्षत्रेष्टीनां ब्राह्मणो
पदेशेन प्रतिदिनं प्रयोगानुष्ठानमभिधायाऽधुना श्रुतिपठितक्रमेण नक्षत्रेष्टिभ्य ऊर्ध्वं भाविनीनामि
ष्टिनां तथैव विधानायादौ चांद्रमसेष्टिमाह। सू। १०॥ अथ श्वोभूते चंद्रमसे प्रतीदृश्यायै पुरोडाशं पंचद
शकपालमित्यभिनीयैवाऽहनि निर्वपेदुदिते चंद्रमसि प्रचरेत। अथयद्धूम्लिंगादिष्ट्यानंतर्ये। श्वोभूते

भरणी द्विपरद्दिने ऽष्टाविंशे ऽहनि। एवमुत्तरत्र श्वः पदानुषंगो ज्ञेयः॥ प्रतीदृश्यानामर्चंद्रकला। चंद्र
३४ मसे प्रतीदृश्यायै प्रतीदृश्या कला गुणविशिष्टाय चंद्रमसे पंचदशा दशाकपालं पुरोडाशं निर्वपे
त्। चंद्रमा वा अकामयत तेत्स्य धिकृत्स्य एतं चंद्रमसे प्रतीदृश्यायै पुरोडाशं पंचदशकपालं निरवप
दिति श्रुतत्वात्। निर्वापकालमाहा ऽभीत्यादि। अभीत्याभिमुख्यमितिशिक्षास्कः। नीत्ने प्रापणे। स्य वर्त्तः
अहनि दिवा न रात्रौ। सूर्यास्तसन्निकृष्टकालमभिनीय आभिमुख्येन प्राप्य एवकार एदहनि पंच
धा विभक्तस्य दिवसस्य पंचमे भाग एव निर्वपेन्न तु प्रातरादिकाले निर्वपणेन वेधांहविरासादनां
तं कर्मापि लक्ष्यते। तेनास्तात्प्राग्घविरासादनांतं कृत्वा ऽस्तमिते ऽग्निहोत्रहोमं कृत्वा ततो होतुरामं
त्रणादि नक्षत्रोदये कुर्यात्। प्रचारकालमाहोदित इति। उदिते चंद्रमसि सूर्यास्तोत्तरं नक्षत्रोदये जा
त एवकाले प्रचरेत् सांगप्रधानयागं कुर्यात्। यथा नक्षत्रोदयकाले प्रधानयागो भवति तथा तद
नुगुणप्रयोगप्राशुभावं विचार्य प्रयोगारंभः कार्यः॥ अत्रांतरा ऽस्वाकस्तरप्राप्तौ ऽग्निहोत्रहोमः कार्य ३४
एव। स चेष्ट्यर्थं विहृतेष्वेवाग्निषु कार्यः। प्रवृत्ते निपतं दोषविशेषात्। प्रतिकर्मोद्धरणमप्रसंगस्तु

क्तेः स्मार्त्ताग्नौ स्मार्त्तहोमोऽपि कार्यः। एवमुत्तरत्रापि ज्ञेयं। प्रातिकमते सामं क्रियमाणो वैश्वदे
वस्तिल्पध्यं ते भवति। पंचदशाककपालानामुपधानं तु चत्वारि मंत्रेण। त्रिष्टान्येकादश। तत्र षट् दक्षिण
तः पंचोत्तरतः तृतीयचतुर्थयो र्द्वितीयचतुर्थयोश्चांतरे त्रीणि त्रीणि प्रादक्षिण्येन। पंचोत्तरतः
प्राक्संस्थानि। अत्राहुः प्राञ्चः केशवः। बोधायनः। अभिन्नीयेवाऽहनि निर्वपेदुदिते चंद्रमसि प्रच
रेदिति। तत्रोदिते चंद्रमसि प्रचरणकालस्य विधानादहनि किंचित्कालं प्रतीक्ष्य प्रदादस्यतेऽप्यारं
भः कर्त्तव्यः। तत्र निर्वापप्रभृत्याग्नेयप्रचारं तं यथासति सूर्ये भवति। ततः सूर्येऽस्तमिते उदिते चंद्र
मसि चांद्रमस्यप्रचारो भवेत्तथा निरीक्ष्यैष्यारंभः कर्त्तव्य इत्यर्थः। तथा चैवं विधे कालेऽहनि हविरा
सादनांतं कृत्वास्तमिते सूर्ये उदिते चंद्रमसि प्रचरेत्। कालं प्रतीक्ष्य यथा विलंबो न भवति तथोपक्र
मः कार्यः। एतत्सर्वं कार्तिकमासस्य कृष्णप्रतिपदारंभपक्ष एव घटते। चैत्राद्यमासस्य शुक्लप्रति
पदारंभपक्षे पौर्णमास्यामध्यपातित्वाद्विरुद्धं। तत्कापर्दिस्वामिनैव परिहृतं। उदिते चंद्रमसि उदि
ते चंद्रमसि उदिते पुनः प्रातरेव इति विकल्पः। स च व्यवस्थितो वेदितव्यः। कार्त्तिकमासारंभपक्षे उदि

तेचंद्रमसीतिपक्षः वैशाखमासारंभपक्षेतुउदितेषुनक्षत्रेष्विति। तत्रतन्नक्षत्राणांचंद्रप्रतिनिधि
३५ त्वंज्योतिःशास्त्रेप्रसिद्धं। नखलुबृहत्पक्षेत्रीनरश्मेः प्रभावःकल्पितमिहहितात्सवीर्यमार्यैः प्रधानं
अतिविकलत्वाच्छरीरेप्येषस्मिन्नोषितेवाप्रभवतिखलुकर्त्तुंसर्वकार्याणियोषिदिति तथासतितन्नक्षत्रो
दयेसतिप्रचारःकर्त्तव्यइतिनविरोधः। ननुकार्त्तिकशुक्लप्रतिपद्यारंभेअन्वहमेवैको [illegible] क्षिविधा
नाच्चांद्रमसेष्टिः शुक्लत्रयोदश्यांचतुर्दश्यांवासायंतदापूर्वमेवचंद्रमसोविद्यमानत्वादुदिते
चंद्रमसीतिकथंविधीयते। सत्यं। उदितेचंद्रमसीतिचंद्रप्रकाशकत्वमुपलक्षितंचंद्रिकायांसत्या
मितसर्पः। ननुयद्देवचंद्रमाउदेतितदैवप्रचारोस्तु न। तथासत्यपररात्रेएवचंद्रमाउदेतिवैशा
खारंभपक्षेतदाहविर्भिःप्रचारेसत्यहनिनिर्वपेदित्यहन्येवनिष्पन्नानांहविषांप्रायतयामत्वप्रसंगा ३५
त्सूर्यास्तमयात्पूर्वंचंद्रमसोनक्षत्राणांवाप्रकाशेसतिप्रचारइतिस्थितमिति। अत्रसोमपाजिना॰
ह्ननिहविरासादनांतमाग्नेयप्रचारांतंचेत्सुमपयोक्तं। देवाग्नेतदेवपंडितानव्यास्तुअत्रबौधाय
नः अहनिनिर्वपेदुदितेचंद्रमसिप्रचरेदिति। अत्रचवैशाखशुक्लप्रतिपदिनक्षत्रेष्ट्यारंभपक्षे

त्रयोदश्यां चतुर्दश्यां वेष्टिमिष्टिः संभाव्यते। न च तत्राह निनिरुप्यप्रचारस्य चंद्रोदयप्रतीक्षा घु
टते। हविषां पातस्यामत्वाः प्रत्तेः। प्रयोगविधिबोधितस्याशुभस्याववाधापत्तेश्च। तथा कार्त्तिककृष्ण
प्रतिपद्यारंभपक्षे शुक्लपक्षे त्रयोदश्यां चतुर्दश्यां वेष्टिमिष्टिर्भवेत्। तत्रास्तात्सूर्योदितचंद्रस्यतो ३६
दयप्रतीक्षासंभवतीति वृद्धाद्दर्शसूत्रार्थमाहुः चंद्रमा नक्षत्राणामधिपतिरिति श्रुतेस्तदीयनक्ष
त्रोदय एवात्र तदुदयत्वेन विवक्षितः। दर्शस्ते हि यस्य पष्ठेरस्य जसैन्यश्च वेत्रेरुद्वः प्रवेशव्यवहारे लो
के। नक्षत्रोदये च यथा [illegible] प्रधान प्रचारो भवति। तदनुगुणप्राशुभ्याव निर्वाहाय सूर्यास्तमयास
न्नपूर्वकाले निर्वाप्यादिकार्यमिति मत्रापि हविष्यासादनांतं दिवाकृत्वा नक्षत्रोदयेऽत्तरं कर्मेति गोपा
लप्रभृतयो वौधायनीयाः। आपस्तंबीयास्तु केचिद्दिवा आग्नेयांतं कृत्वोदये चांद्रयागः कर्तव्य इ
त्याहुः। अत्र गोपालाद्युक्तिर्युक्तेति मन्यामहे॥ अथ स्वव भ थे न चरंतीत्यादौ चरतेरंगप्रधानसाधार
ण्यस्यन्यायविभ्दिर्याज्ञिकैश्च स्वीकार दर्शनात्। प्रचरेदिति तस्यैव धातोः प्रयोगादित्याहुः। एकोनत्रिं

ऽहोरात्रे द्विमाह॥ सू०॥ ते एतमहोरात्राभ्यां चरुं निरवपतां ह्रस्वानां व्रीहीणां शुक्लानां च कृष्णानां च
३६ स वात्सोऽहर्गृध्रे श्वेतायै च कृष्णायै चेति। श्वो भूतेऽभिनिर्मिवाहनी समुपज्यते अहोरात्रसंधौ प्रचरेदित्यध्या
हियते ते एतमित्यादीनि श्रुतिवाक्यान्येकसंहितावसवितासूत्र तेन व्यवहृतानि। अहोरात्राभ्यां देव
ताभ्यां चरुं निरवपतां निर्वपेत् अहश्च रात्रिश्चेति द्वित्वादिवचनानि। चरोर्विशेषं हविर्द्रव्यमनियममा
ह ह्रस्वानामिति। शुक्लानां श्वेतवर्णानां। एवं कृष्णानां च। ह्रस्वानां शुक्लकृष्णव्रीहीणां संमिश्रितानामेव
निर्वापो न तु पृथक्स्थितानां। ह्रस्वानां व्रीहीणामित्यधिकृत्य तद्गुणनिर्देशात्। द्विश्वकारो मिश्रितसमुच्च
यार्थः ह्रस्वानामित्यधिकृतत्वात्। न तु ये मुष्टीन्निर्वपतीति श्रुतानि र्वापे मुष्टिपृथक्त्वादुपदिष्टास्तेषु
मध्ये प्रतिमुष्टि पृथक्स्थितानां व्रीहीणामुपादानमभीष्टं चेत्तदा व्रीहीणां शुक्लकृष्णानामर्द्धार्द्धमित्येव ३६
सूत्रं कृतं स्यात् ह्रस्वानामित्याद्युक्तं गौरवं सूत्रमत्र कृतवान्। करोति च। तस्मात्संमिश्रितानामेव निर्वापः त
था च प्रदीपे। शुक्लकृष्णव्रीहीन्संमिश्रानेव निर्वपेदिति। केचित्तु वोपि। शुक्लकृष्णव्रीहीन्सर्वस्रज्येति वो आप

नीये देवः शुक्लकृष्णव्रीहीन्मिश्रानिति आपस्तंबीयेपि संदृष्टः शुक्लकृष्णव्रीहीणामिति महा
दृष्यानां द्विप्रकारश्च दृष्टः पङ्क्तिर्दृश्यार्थः सूत्रयोरवंतु स्पष्टार्थं एवं च सत्यत्र गुणभेदान्नानावीज
धर्मा भवंति। अस्मिन्पक्षे एतत्सूत्रे धातव्युरवसा नीये श्विवव्रुति मुष्टिवस्त्रबद्धानां कृष्णानां ग्र
हणं। संस्कारः शुक्लपूर्वं कर्तव्यः ग्रहणवदेकस्मात्स्थास्थामनेकपश्चवदानव [illegible] नवघ्र्पणं॥
उभयेभ्यः सहावदानग्रहणमित्यादिरितेयं प्रयोगकारैस्तु कैश्चित्सूत्रनारेष्यादीस्य व पक्षे संचरचरो
रितरपक्षे संचरयोरपि नक्षत्रदेवताकद्रव्यमिव नाना बीजपदार्थाः करणसौकर्यायनानावीज
धर्मा उपेक्षिता इति भाति सूत्रार्थतत्वं त्वाचार्य एव विदुः चरोः श्रपणसाधनभूतमुपसर्जनीक्रिया
मद्रव्यविशेषमाह सवात्योरिति। एकामृतवत्सा गौरपरा जीववत्सा च ते च द्वे अपि गावावेके नतेने
वजीववत्सा या गोर्वत्सेन दुह्येते ते गावौ सवात्याविति संज्ञके तयोर्मध्ये एका श्वेता यैव श्वेताशुक्लवर्णा
शुभ्रा कपिला वा अपरा कृष्णा यैव कृष्णा कृष्णवर्णा मृतवत्सा जीववत्सा वा कृत्यनुकरणाय च
तुर्थी प्रथमार्थे। श्वेता च कृष्णा चेति श्वेतकृष्णे सर्वत्र लिन्न्यपांसीत्यूहः। अहो एतरेवा अकामस्मे
९ वात्सा गौनोर्दुग्धे संमिश्रिते एवोपसर्जनीस्थानापन्ने दुग्धमध्ये चरुः श्रपयेदित्यर्थः।
अत्रकर्म मते सर्थीरेप्रणयनं ९

तामितिप्रकृत्य तेएतमहोरात्राभ्यांचरुंश्रपयेदित्यर्थः अत्रकर्कमतेसक्षीरं श्रपणपनं व्रा निरव
३८ पतां ह्रस्वानां व्रीहीणां शुक्लानांच कृष्णानांच सवात्योर्दुग्धे। श्वेतायेच कृष्णायेचेत्यादिश्रव
णात् अत्रयांचोनव्याश्चचरोर्व्रीहिद्रव्यनिर्णयकत्वेनाविरोधादनुमसाश्चरोः शुक्लकृष्णगु
णविशेषविहितं संसृष्टमहोरात्रदेवताकं द्रव्यमिच्छंति याज्ञिकाचारेप्येवमस्ति। पौरोडाशीयं
द्रव्यं त्वौत्सर्गिकमेवेत्युक्तं प्राक् यत्तु केषांचित्तंसंचरयोरपिसंसृष्टा एवव्रीहय इतिलेखनं तद्व्रीहि
मयपुरोडाशविषयमेवज्ञेयं समानन्यायात् अत्रमतभेदः अस्यादृष्टेरारंभकालश्चांद्रमसेष्टिवत्
एवा ।प्रचारो[illegible]स्तसंधावितिप्रथमःकल्पः पद्दस्पोदयसंधौ निर्वापः अस्तसंधौप्रचारः तेनोदया
त्प्रागुदयकालानुरोधेनोद्धरणादियच्छंतामित्यालंभांतं कृत्वाततोऽग्निहोत्रं हुत्वोदयसंधौनि
र्वापमात्रं कृत्वाविरमेत् अहोऽतिमे पंचमेऽशेशेषाभिमर्शनाद्याग्नेययागांतं कृत्वाऽस्तसंधा ३९
वहोरात्रयागः कार्यः ततोऽनुमतिस्विष्टकृद्यागौकृत्वाग्निहोत्रं जुहुनेत् ततः संचरस्युक्षणादीति
द्वितीयः एवं पक्षद्वयसत्वेपियाज्ञिकाः पूर्वपक्षमेवस्वीकुर्वंति अहोरात्रयोः संधिकालस्तुको

मीतालक्षणं यस्मिन्काले मंडलखंडस्योपलब्धिस्तत्संधिरिति अत्र कालस्यातिसूक्ष्मत्वात्सं
धौ प्रधानावदानप्रक्षेपदुष्करत्वात्पूर्वं विज्ञेयं इदानीमेकोनत्रिंशेऽहन्येव रात्रावुपवसथेष्टिमाह।
सू०। अभिनीयैव रात्रौ निर्वपेदुपवसिथं च चरेत् अहोरात्रेष्टिर्दिन एवाऽहोरात्रेष्वनंतरं तस्यामे
व रात्रौ रात्राविति रात्रेस्तुरीययाम उपलक्ष्यते रात्रेरपरभागे उषःकालप्रत्यासन्न एव काले
प्रयोगप्राशस्त्यभावानुरोधेन च रुं निर्वपेत् निर्वापादि हविरासादनांतं कृत्वोपवसिथ उषःकाले प्र
चरेत् होतुरामंत्रणादि प्रधानयागं कुर्यादित्यर्थः शेषं पूर्ववदेव व्याकृतं ततोऽग्निहोत्रहोमः॥
एवमेकस्मिन्नहोरात्रे द्वे इष्टी उक्ते। द्वितीयेऽहन्युपवसथेष्टेः समाप्तिः अतस्त्रिंशत्तमेऽहन्युपवसथे
ष्टिं समाप्य तस्मिन्नहनि विरमेत् द्वितीयपर्वखंडादेऽन्यहमेकैकेष्टिविधानात् उषा वा अकाम
यतेत्यधिकृत्य सैतमुपक्ते चरुं निरवपदित्यादिश्रुतत्वात् उषःकालस्तु द्वेधा गंत्रपकृम्दिः स्वी
कृतः सप्तपंचभवेत्स्यात् पंचपंचारुणोदयः अष्टपंच उषःकालः शेषः सूर्योदयः स्मृत इति वाल
भूषायां नाडिकाषट्पंचाशत्यातस्त्वेकाधिकोऽरुणः उषःकालोष्टपंचाशत्छेषः सूर्योदयः स्म

तदुक्तं नागदेवाह्निके पंच पंच उषःकालः सप्त पंचारुणोदयः अष्ट पंच भवेत्प्रातः शेषः सूर्योदयः
३८ स्मृत इति पठंति अत्र शिष्टाचारः शरणं अपि कश्चिंशत्तमेऽहनि नक्षत्रेष्टिमाह सू॰ अपेतस्मिन्न
क्षत्रायचरुं निर्वपति यथा त्वं देवानामस्येवमहं मनुष्याणां भूयासमिति निर्वपणकाले यजमाना
यतन आसीनो जपत्यभिनीयैवाह नि निर्वपेदुदितेषु नक्षत्रेषु प्रचरेत् अथ तत्राब्द अहो एत्रोपष्टे
ष्टिः प्रांकृतयागस्यानंतर्ये प्रागुक्तश्वोभूते इत्यस्यात्रोक्तन्यायेनानुषंगः अपि श्वोभूते एकत्रिंश
त्तमेऽहनि एतस्मै सायमुदेष्य माणायनक्षत्राय नक्षत्रा स्व्य देवतायै अत्राप्यहोमात्रेष्टिवद्दिव
सस्यांतिमेपंचमे भागे इष्टेरारंभः नक्षत्रोदये होतुरामंत्रणादिसांगप्रधानयाग इति ज्ञेयं त्रोषं
स्व्या निगदव्याख्यातं निर्वपणकालीनो जपस्तु संचरनिर्वापानंतरं नक्षत्रदेवताहविर्निर्वपणकाल एव
भवति न तु संचरहविषोः श्रुतो नक्षत्रहविर्निर्वापसंबंधेन समाम्नानात् सच्चाऽग्निः होर्तैरभि ३८
तिप्राकृतानुमंत्रणोत्तरमिति प्राचः पूर्वं जपः पश्चादनुमंत्रणमिति नव्याः। कात्यायनीयानां तु य
था त्वमित्यादिजपमात्र एव भवति नत्वनुमंत्रणं प्रकृतावेकाऽविहितत्वात् अपेतस्मै नक्षत्रायचरुं

निर्वपति यथा त्वं देवानामसि। एवमहं मनुष्याणां भूयासमित्यादि श्रुतत्वात् अथैकत्रिंश एतमेऽ
हन्येव एत्रौ सूर्य नक्षत्रेष्टिमाह सू० अथैत ६ सूर्याय नक्षत्रेभ्यश्चरुमित्यभिनीयैवं रात्रौ नि
र्वपेदुदिते प्रचरेत् अथ त्रयस्त्रिंशे नक्षत्रेष्ट्येनंतर्ये। नक्षत्रेष्टिसमा [illegible] स्यनंतरं तस्यामेव रात्रौ ए
त्राविजिपदमुषः कालोपलक्षकं प्राग्वत् पूर्ववत्तत्र प्रणीतत्वात् इति शब्दः प्रकारे। अतोऽत्तरा
प्रातरग्निहोत्रं कृत्वाऽग्रभागांतं कृत्वा उदिते सूर्ये सूर्योदये जाते प्रचरेत् प्रधानयागं कुर्यादि
त्यर्थः अत्रोदयो मंडलोदय एव न तु प्रांशु प्रागुक्तः अस्मिन्नहन्यपि सूर्येष्टिं समाप्य विशमोवि
धेयश्चत्युक्तं सूर्येवाअकामयतेतिप्रकृत्य स एतं ६ सूर्याय नक्षत्रेभ्यश्चरुं निरवपदित्यादिश्रु
तत्वात् अथ त्रयस्त्रिंशेऽहन्यदितीष्टिमाह सू० अथैतमदित्यै चरुं सूर्येष्टिसमाप्तेः श्वो भूतेऽहन्ये
व निर्वपतीति शेषः अथैतमदित्यै चरुं निर्वपतीत्यादिश्रुतत्वात् अथ चतुस्त्रिंशेऽहनि वैश्वदेवे
ष्टिमाह सू० अथैतं विश्वेभ्यो देवेभ्यश्चरुमिति प्रजाति इति शब्दः सत्रतंत्रसंबंधीष्टिसमाप्तिद्योतनार्थः॥
चतुस्त्रिंशत्तमे सत्रसमासेऽहनि विश्वेभ्यो देवेभ्यश्चरुं प्रजाति निर्वपति। अथैतं विश्वेभ्यो देवेभ्यश्चरुं निर्वपतीति

श्रुतेः कर्मसमाप्त्यनंतरं कृतंकर्मविष्णवेसमर्प्पणीयं तथाचगीतायांभगवद्वाक्यं यत्करोषियदश्ना
३९. सियज्जुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति अस्मिन्नर्थेश्रुतिवाक्यमुदा
हरति यज्ञोवैविष्णुर्यज्ञएवांततः प्रतितिष्ठतीति ब्राह्मणं अंततोंऽतेकर्मसमाप्तौतेकृतंकर्मय
ज्ञेविष्णौप्रतितिष्ठतिसमर्प्पयति एवकारएतत्कर्मसमाप्तौविष्णूद्देशेनब्राह्मणसंतर्प्पणदक्षिणा
दाननामस्मरणादिनैवकर्मणः परिपूर्णतासिद्धिर्भवेत ज्ञान्यफलावाप्तिर्नान्यथेति श्रुत्यभिप्रा
यः यज्ञोवैविष्णुर्यज्ञएवांततः प्रतितिष्ठति सोत्रजुहोति विष्णवेस्वाहायज्ञायस्वाहा प्रतिष्ठायैस्वा
हेति श्रुतत्वात् अत्रसमाप्तः श्रौतंब्राह्मणेतृतीयाष्टकेप्रथमः प्रश्नः कृत्तिकादिसु सत्रिंशद्दिष्टि
साधारणांदक्षिणामाह सः वरोदक्षिणाभवतीविज्ञायते कृत्तिकादिष्विष्टिष्वन्वाहार्यस्थानेइ
ष्टिदक्षिणावरोभवति इत्येवंविज्ञायते विविशेषे ज्ञाअवबोधने अत्रोपादाने अनेकार्थत्वात्। ३९
श्रुतिविशेषेणगृह्यतइत्यर्थः वरस्वरूपंतुमूल्याध्यायेउक्तं चतुः कार्षापणोवरइति लोगाक्षि
स्त्वन्यथाऽऽहः। वरएकोगांविजानीयाच्चतुर्वर्षामितिश्रुतिः दक्षिणानांवरिष्ठंपदद्वंतमपरेब्रुव

न्निति याज्ञिका अपि लौगाक्षिमतमेवाचरंति ततश्चान्वाहार्यस्थानेव एभिधायकं गोद्रव्य
मेवाऽसादयेत् वएभिधायकत्वादेवांऽ तएहरणं कर्कमते विभवत्येव ऊर्मिस्वस्य स्वत्वानेवरो
स्पूर्जमित्येवोहो भवति न तु गोरसीति पक्षांतरमाह सू॰ अपाघावद्वा दक्षिणाभवंतीति त्रेष:
वाविकल्पो। वा अथवा अपाघावत् अपाघासु या दक्षिणाः श्रुपंते ता दक्षिणाः कृत्तिका दीक्षि
ष्वपि भवंति। अपाघा अपाघाख्याः पंचेष्टपश्चात् होत्रीयेवोधायनीयेपठितास्ताभिः पंचाहसा
ध्यंसर्गसत्रं संपद्यते तास्सु च श्रुतौ दक्षिणाः श्रुताः पष्ठौहीवरंस घात्कर्षसंच स्त्रियै चाभारं
सम्ध्या इति। पष्ठौही चतुर्वर्षा गौः कर्षसंकांस्यं। कांस्यपात्रं। स्त्रियै चाभारं। षष्ठ्यर्थे चतुर्थी। स्त्रि
या आभारं नारीआभरणविशेषो निष्कपर्णतं सुवर्णं। निष्कप्रमाणं मूल्यार्धमायेत्युक्तं। निष्कोपं चाशा
देवस्यादिति इत्येतास्तिस्रो दक्षिणाः समर्धौक्त द्विकामाय भवंतीति श्रुत्यर्थः अस्मिन्पक्षेगवा
दीनां निष्कपद्रव्यं प्रथासंपन्नमासादयेत् आलंभमंत्रे पष्ठौहीवरकर्षसाऽभारमसीत्यूहः संक
म
ल्पेऽहं प्रयोगे वक्ष्यामः बौधायनीयाऽपस्तंबीयानामूहविशेषो दैवे सत्यप्रयोगे सिद्धिनोस्त्येवेति
बो।

नेहविस्तार्यते। एवं द्वात्रिंशाद्दिर्दिवसैरुपवसथादारंभद्दिवसाभ्यामंतएवविरामिताऽहोभ्यांच
सहितैः संकलनया षड्त्रिंशाद्दिर्दिवसैर्नक्षत्रसत्रंसमाप्याऽधुनास्तत्रिंशोऽहनि सत्रांगत्वे
४० नाऽनंतरंकर्त्तव्यंकर्माह सू०। प्रसिद्धः पशुः प्राग्वच्छोभूतेऽरत्यनुषज्यते नक्षत्रसत्रसमाप्त्यनं
तरमव्यवहितेनैवश्वोभूते द्वितीयेऽहनि प्रसिद्धः पशुः पशुरितिश्रुत्या पश्वपागस्य प्रसिद्धि
स्तद्यागंकुर्यात् कश्चासौ। निरूढसंज्ञकः पशुरिंद्राग्नी देवताकः कुत एतत् ऐंद्राग्नेन निरूढप
शुना प्रावृषि संवत्सरे संवत्सरे यजेतेति शास्त्रांतरे श्रवणात् वीप्सया नित्यत्वश्रवणं तेनास्यप
शुरिति नाम्ना प्रसिद्धिः प्रसिद्धोयो निरूढः पशुस्तेन पशुना सत्रांगत्वेन यागं कुर्यादित्यर्थः।
केचित्तु पशुस्थाने वैश्वानरेष्टिमिच्छंति। तथाच चंद्रिकायां एवं नक्षत्रसत्रसहात्रिंशदहानि ४०
भवंति ऋषभो वैश्वानरस्य दक्षिणेति श्रुतेः यत्तु कर्म्मं वा सद्दशितिसूत्रं तद्रूढताग्रयणस्यनव
स्याराग्ना घुक्त निमित्तविशेषेष्वेव ज्ञेयं केचिद्विकल्पमिच्छंति निरूढपशोः प्रयोगविधिस्तुका
त्यायनसूत्रप्रयोगसारेऽन्यत्र पृथङ्निरूपितस्ततोज्ञेयः वैश्वानरेष्टेः प्रयोगविधिंतु प्रयो

गं॰ते लेखिष्यामः एवं वैकृतं सांगं सत्रमुक्त्वेदानीं सत्रतंत्रमध्ये मुख्यकालेंतरितयोर्दर्शपूर्णमा
सयोर्गौणकाले कर्त्तव्यप्रकारमाह सू॰ प्रसिद्धेष्टिः प्रसिद्धः पथ्यः पाथिकृत्येष्ट्येष्ट्वा कर्त्तव्येतिरो
षः पत्नी॰ः सत्रांगत्वात्स्ततएपठितं प्रसिद्धः पथ्युरिति सूत्रं क्रमव्यत्ययेन प्रागेव व्याकृतं प्रसिद्धेष्टिः
प्राकृतीदर्शपूर्णमासेष्टिः पाथिकृतिर्नित्यानां मुख्यकालातिक्रमनिमित्ता नैमित्तिकेष्टिः यदि
सत्रमध्ये मुख्यकालप्राप्तौ दर्शपूर्णमासौ दैवान्मानुषाद्वा न कृतौ तदा सत्रसमाप्त्यनंतरं गौण
काले पाथिकृत्येष्ट्येष्ट्वा पथिकृदिष्टिं कृत्वा प्रसिद्धेष्टिर्दर्शपूर्णमासाख्या वमापां सत्रारंभे तंत्रेण कर्त्त
व्यौ पौर्णमास्यां सत्रे रंभे तु स्यपक्तंत्रेणैव गौणकालस्याप्यतिक्रमे तु नैमित्तिकमेव प्रवृत्ते नियतं
द्रो षविशेषात् प्रतिज्ञाते व्युतिपत्तौ चेति कात्यायनीयसूत्रद्वयार्थसम्मतोऽयमेव सूत्रार्थ उपपद्य
ते बौधायनीये प्रयोगादौ देवस्तु गौणकालस्याप्यतिक्रमे पथिकृत्पूर्वं तयोः करणमित्येवं सूत्रार्थमा
ह तथा हि। पाथिकृत्येष्ट्येष्ट्वा दर्शपूर्णमासाभ्यां यजेतेति प्रयोगांते सूत्रकृदुक्तं ग्रहेस्यकर्मणो दर्शपू
र्णमासाकरणं अंगमिति निमित्तव्यं दीक्षाकालीनाग्निहोत्राकरणनिमित्तप्रायश्चित्तवदत्रापि प्रा
[मि]

थिकत्वादुपदेशानुपपत्तेः नच पशुतुल्येयं पाथिकृती नप्रायश्चित्तार्थेति शंक्यं अतिपन्नप्राय
श्चित्तार्थं पाथिकृतीं कृत्वेति प्रदीपोक्त विरोधापत्तेः अतः प्रयोगमध्ये प्राप्तौ दर्शपूर्णमासौ कर्त्त
४१ व्यावेव अतएव कपर्दिस्वामिना भरण्यादिने नक्षत्रसत्र संकल्पेपि परे हन्यामावास्येनेष्ट्वा कृ
ति केचित्ः कर्त्तव्येत्याह सत्रं तु प्रारब्धं नक्षत्रसत्रस्य पदे वादति क्रांतदर्शपूर्णमासयोर्गौणका
लस्याप्यतिक्रमे प्रायश्चित्तमात्रौचित्येनाप्राप्तकर्त्तव्यतयोः कर्त्तव्यताप्रापणार्थमिति तथा
प्रयोगांते आपस्तंबीयेपि यदि दर्शपूर्णमासावतिक्रांतौ तदतिक्रमनिमित्ते पाथिकृती वैश्वा
नर्यौ पूर्णाहुती वा कृत्वा दर्शपूर्णमासौ कर्त्तव्याविति प्रदीपे तु नक्षत्रसत्रमध्यपातिन्यौ दर्शपूर्णमा
सेष्टी स्वे स्वे काले अकर्त्तव्ये अतिक्रमितव्ये सत्रसमाप्त्यनंतरं पशुनेष्ट्वाऽतिपन्नप्रायश्चित्तं पाथि
कृतीमिष्टिं कृत्वाऽतिक्रांतदर्शपूर्णमासेष्टी कुर्यादित्युक्तं आपस्तंबीये केशवेन त्वन्यथैव वि
वृतं तथाहि नक्षत्रे[illegible]ष्टिषु वर्त्तमानासु प्रकृतिकाले प्रकृतिं कृत्वैव नक्षत्रेष्टिः कर्त्तव्येति न्याय ४१
विदः तथापि नक्षत्रेष्वनुष्ठानानां [illegible] त्परं चातिपन्नानां दर्शपूर्णमासानां पाथिकृदिष्ट्यानंतरे

ष्टिं कृत्वा दर्शपूर्णमासौ कर्त्तव्याविति वो धापने नोक्तं कपर्दिस्वामिना नक्षत्रेष्टिषु वक्तव्यांश
मुक्त्वा प्रसिद्धं पशुना यजेत पाथिकृत्येष्ट्या प्रसिद्धं दर्शपूर्णमासाभ्यां यजेतेत्युक्तत्वाच्च तस्मान्न
क्षत्रेष्टीनां मध्ये दर्शपूर्णमासौ न कर्त्तव्यौ यथा सोमे दीक्षिणीयोर्ध्वमासमासे दर्शपूर्णमासयो
र्निवृत्तिस्तद्वत्रापि अयमाशयः। इमाः सर्वा अपीष्टय एकं कर्म प्रत्येकमिष्टीनां फलन्ने हे
पि नक्षत्रसत्रेणेति वचनात् कृत्तिकेष्ट्यादि वैश्रवणेष्ट्यंतं सप्तत्रिंशदिष्टयोप्येकं कर्म तेन कृति
केष्टिसंकल्पप्रभृति वैश्रवणेष्टिसमाप्तिपर्यंतं यजमानस्याशौचं न प्रतिबंधाय नक्षत्रेष्टिभिरिति
समुच्चयेन सर्वासामेकोपक्रमात् अग्निहोत्रं तु स्वे स्वे काले हुयत एव। सोमे तु न सोमेऽग्निहो
त्रं जुहोतीति निषेधवचना दीक्षितस्यान्नं तदानेनाऽग्निहोत्रस्य कृतत्वात् यतू एत्र मे हुयमानो
ग्निर्लौकिकः संपद्य तइति वचनाच्चाऽवश्यमग्निहोत्रहोमो भवतीति याज्ञिकास्तु मुख्यप्राप्ते
र्ण काले ऽग्निहोत्रदर्शपूमासादि कर्त्तव्यमेवेति मन्यंते इदानींतनानां संप्रदायोपि तथैवास्तीति। के
शवस्त्वन्यथाऽत्रसूत्रपाठमाह प्रसिद्धेष्टिः प्रसिद्धः पशुः पाथिकृत्येष्ट्या प्रसिद्धं दर्शपूर्णमासा

भ्यांपजेतेति युक्तोऽयंपाठः अस्मिन्पाठेव्यवहितान्वयपोजनासूत्रस्यनस्यात् प्रत्ययसिद्धेश्चिरि
४२ स्येतत्पदमतिरिच्यतएव अतःपरंपरयामूलपुस्तके दृश्यमानएवपाठःसाधुर्मंतव्यः सत्रस्य
काम्यत्वमाह सू॰ पापंनिर्णुदज्योति [illegible] ष्टूमुपजापतेऽपपुनर्मृत्युंजयतीतिहस्माहबौधायनः
पापमित्येकत्वमविवक्षितं जन्मप्रभृतिसंचितानिपापानिनिर्णुदयापेभ्योनिर्मुक्तोविधूतपा
प्मास्वयंभूत्वाज्योतिष्टूज्योतिस्ते जोब्रह्मवर्चसत्वम् प्रजापतेस्वशरीरे तेजोभिवर्द्धिंसाप्नोति
अपपुनर्मृत्युंजयति अपमृत्योरेवपरिहारोभवतिनतुमहामृत्योः ब्रह्मणापितंपरिहर्तुमश
क्यत्वात् इतिएवंबौधायनाचार्योहस्माहब्रवीति एवंकामदृष्टपुरस्कारेणसत्रंकाम्यमुपदि ४२
ष्टं केशवस्तुद्विविधंसत्रफलमाह यथाप्रयोगादौ नक्षत्रसत्रेणयुजिएनंत्वाप्यज्योतिषामयने
नेष्ट्वापापंनिर्णुदेत्यादिसमानं यथाचांते नक्षत्रसत्रेणेष्ट्वापापंनिर्णुदज्योतिष्टूमुपपद्यतेऽप
पुनर्मृत्युंजयतितेजस्वीशुद्धःपूतःपुण्यलोकोविरजाविपाप्माब्रह्मवर्चसीभवतीत्याहस्मभगवा
न्बौधायनइति द्वेवोविप्रयोगादौयथाकेशवस्यपाठस्तैर्व्याह तदेवंफलसंकीर्तनात्सत्रंकाम्यंक

मैरुक्तं तत्रपापनिर्मोदपूर्वकज्योतिष्टोमद्दपपुनर्मंत्रं जपो भवतीत्येकमेव फलमिति गोपा
लः प्रदीपे तु श्रुत्युक्तोऽन्नाद्यादिकाम इत्येकं आयुष्काम इति द्वितीयं प्रत्तं जपकाम इति
तृतीयं ज्योतिष्काम इति तुरीयमिति फलचतुष्टयमंगीकृतं तथैव संकल्पोदाहरणदर्शनात्
बहुतरपापाक्रांतएनोनिवर्हणार्थं नक्षत्रसत्रेण यजे तेति चंद्रिकायाम् विप्रेयाचरणद्वंद्वमाधा
यहृत्स्थिमंगलम् बलभद्रतनूजेन देवभद्रेण धीमता १ कातीयानां हितार्थाय भाष्यं चेदं मया
कृतं संक्षिप्तं पूर्वजैर्यस्मान्नकृतं दृढयाज्ञिकैः २ तेन मम्पि स्वशाखीयापुक्तं चेदपरेऽपि व
ातुष्यं तु याज्ञिकाः सर्वमच्छ्रमंपरिलोक्यते ३ ज्ञानादज्ञानतो वापि यत्रो हविवृतं वानहम् ४
पश्चाश्रमः समुमया दत्तं तत्पंतद्वसंशोध्यं याज्ञिका अपमंजलिः ४ न मदीयाकृतिर्यस्मादेषा
यज्ञस्य वैकृतिः यथामेरितवान्यज्ञस्तथा विवृतवानहम् ५ यत्श्रश्रमः समुत्पन्नो भाष्यस्या
स्यविलेखने यज्ञभोक्ताविभुस्तेन प्रीयतां परमेश्वरः ६ नेत्रेंदुवसुभूवर्षे स्थितेन भस्तिभास्क
रै पितृमेचद्वितीयायां सूत्रभाष्यमिदं कृतं ७ भस्तत्रसूत्रभाष्यमिदं देवभद्रकृतेवरे पंक्तिश

तीयपंचाशद्ग्रंथसंख्येयमीरिता ८ इतिश्रीमन्महायाज्ञिकनभारद्वाजीयपाठकश्रीरामचंद्रसू
४३ नुगंगाधरपाठकेंवंशसंभूतपाठकश्रीवलभद्रात्मजदेवभद्रकृतौबोधायनमुनिप्रणीतमापस्थि
तसूत्रांतर्गतनक्षत्रसत्रपद्धसूत्रभाष्येद्वितीयखंडेमध्यायस्तुरीयं ४ भाष्यंसमाप्तं बो
धायनोक्तनक्षत्रसत्रसंज्ञाध्वरस्यतु सूत्रभाष्यंपुरस्कृत्वाश्रुतिसूत्रादिसंमतः १ कात्यायना
नुसारेणकर्कदेवमतेनतु हौत्रमंत्रैश्चसंयुक्तः प्रयोगोरच्यतेऽधुना २ तत्र संवत् १९७३ वैशा
खशुक्लत्रयोदश्यांगुरौ धर्माधिकारीसुपनामकोरघुनाथपाठकात्मजःसखारामोव्यलिखत
।शुभंभूयात श्रीपद्मनाभप्रणोजपति श्रीरेणुकायैनमः श्री॥ इदंपुस्तकंमहादेवदा
दासहस्त्रायदत्तंकाश्यां॥

४३

[OrderDescription]
,CREATED=02.06.20 14:31
,TRANSFERRED=2020/06/02 at 14:43:23
,PAGES=85
,TYPE=STD
,NAME=S0003055
,Book Name=M-2964-SAHSTRA DANTKATHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF

FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,